ले ते पातु ब्रह्मानन्तो यथाक्रमम् वज्राद्यायुधाः पान्तु दशदिक्षु यथाक्रमम् इति ते कव
चं पुण्यं त्रैलोक्ये दुर्लभं परम् यद्धृत्वा पठनाद्देवाः सर्वैश्वर्यमवाप्नुयुः ब्रह्मा विष्णुश्च रुद्रश्च
धारणात्पठनाद्यतः सृजन्त्यवन्ति हन्त्येवं कल्पे कल्पे पृथक्पृथक् पुष्पाञ्जल्यष्टकं देव्यै मूलेनैव
पठेत्ततः युगायुतकृतायास्तु पूजायाः फलमाप्नुयात् वाणी वक्त्रे वसेत्तस्य सत्यं सत्यं न सं
शयः प्रीतो मया प्रीते वास्य पुरश्चर्याविधिः स्मृतः भूर्जे विलिख्य गुटिकां स्वर्णस्थां धारये
द्यदि कण्ठे वा दक्षिणे बाहौ सोपि सर्वतपोमयः ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रं प्राप्य पा
र्वति माल्यानि कुसुमान्येव भवन्त्येव न संशयः इति श्रीभैरवीतन्त्रे अन्नपूर्णाकवचं समाप्त
म् अथान्नपूर्णास्तोत्रं नमः कल्याणदे देवि नमः शङ्करवल्लभे नमो भक्तिप्रदे देवि अन्नपू
र्णे नमोस्तु ते १ नमो मायागृहीताङ्गि नमः शङ्करवल्लभे माहेश्वरि नमस्तुभ्यम् अन्नपूर्णे न

न॰
मा॰
२५४

254

मोऽस्तु ते २ उद्यद्भानुसहस्राभे नयनत्रयभूषिते चंद्रचूडे महादेवि विश्वान्नपूर्णे नमोऽस्तु ते ३ वि
चित्रवसने देवि विश्वान्नपूर्णे रत्नेन्द्रे शिवहृत्संहृतामोदे विश्वान्नपूर्णे नमोऽस्तु ते ४ साधकाभी
ष्टदे देवि भवदुःखविनाशिनि अव्यभावतते देवि विश्वान्नपूर्णे नमोऽस्तु ते ५ षट्कोणपद्ममध्य
स्थे षडंगयुवतीमये ब्रह्माण्यादिस्वरूपे विश्वान्नपूर्णे ६ देवि चंद्रकृतापीडे सर्वसाम्राज्यदा
यिनि सर्वानंदकरे देवि विश्वान्नपूर्णे ७ इंद्राद्यर्चितपादाब्जे रुद्रादिरूपधारिणि सर्वसम्प
त्प्रदे देवि विश्वान्नपूर्णे नमोऽस्तु ते ८ इमं काले पठेद्यस्तु स्तोत्रमेतत्समाहितः तस्य गेहे स्थि
ता लक्ष्मीर्जायते नात्र संशयः प्रातःकाले पठेद्यस्तु मंत्रजापपुरस्सरत् तस्यान्नस्य समृ
द्धिस्याद्वर्धमाना दिने दिने यस्मै कस्मै न दातव्यं न प्रकाश्यं कदाचन प्रकाशनात्कार्यहानिः
स्यात्तस्माद्यत्नेन गोपयेत् इत्यन्नपूर्णास्तोत्रं अथ त्रिपुटाकवच श्रीदेव्युवाच भगवन्स
र्वधर्मज्ञ सर्वशास्त्रार्थपारग विशाखिरूपलक्ष्म्याश्च कवचं यत्प्रकाशितं सर्वार्थसाधनं ना
म कथयस्व मयि प्रभो श्रीभगवान् शृणु देवि प्रवक्ष्यामि कवचं परमाद्भुतं सर्वार्थसाधनं ना
म त्रैलोक्ये चातिदुर्लभं सर्वसिद्धिमये देवि सर्वैश्वर्यप्रदायकं पठनाच्छ्रवणान्मर्त्यस्त्रैलोक्यैश्वर्यभा

ग्यभवेत् सर्वार्थसाधनस्यास्य कवचस्य ऋषिः शिवः छंदो विराड्दक्षिणाकालिरूपा नगेन्द्रजा देव-
ता धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः श्रीं बीजं मे शिरः पातु लक्ष्मी रूपा ललाटके
ह्रीं पातु दक्षनेत्रे मे वामनेत्रे महेश्वरी क्लीं पातु दक्षकर्णे मे वामे कामेश्वरी तथा लक्ष्मी घ्रा-
णं सदा पातु वदने पातु केशवः गौरी तु रसने पातु कण्ठं पातु महेश्वरः स्कन्धदेशं रतिः पा-
तु भुजौ तु मकरध्वजः शंखनिधिः करौ पातु वक्षः पद्मनिधिस्सदा ब्राह्मी मध्यं सदा पातु नाभिं
पातु महेश्वरी कौमारी पृष्ठदेशं मे गुह्यं रक्षतु वैष्णवी वाराही च सक्थिनी पातु चैन्द्री पातु पदद्वय-
म् भार्यां रक्षतु चामुण्डा लक्ष्मी रक्षतु पुत्रकान् इंद्रः पूर्वे सदा पातु आग्नेय्यामग्निदेवता याम्ये
यमस्सदा पातु नैरृते निरृतिस्सदा पश्चिमे वरुणः पातु वायव्यां वायुदेवता सौम्ये सोमः सदा
पातु ऐशान्यामीश्वरो विभुः ऊर्ध्वं प्रजापतिः पातु अधश्चानन्तदेवता राजद्वारे श्मशाने च अ-
रण्ये प्रान्तरे तथा जले स्थले चान्तरिक्षे शत्रूणां निवहे तथा एताभिः सहिता देवी त्रिबीजा-
त्मा महेश्वरी त्रिशक्तिस्सा महालक्ष्मीस्सर्वत्र मां सदावतु इति ते कथितं देवि सारात्सारं प-
रात्परम् सर्वार्थसाधनं नाम कवचं परमाद्भुतम् अस्यापि पठनात्सद्यः कुबेरोपि धनेश्व-

श्री:
त सो
२५५

255

वः इंद्राद्यास्स कल्ला देवाधारणात्पठनाद्यतः सर्वे सिद्धीश्वरास्तेतः सर्वैश्वर्यमवाप्नुयुः
पुष्पांजल्यष्टकं दत्वा मूलेनैव पठेत्सकृत् संवत्सरकृतायास्तु पूजायाः फलमाप्नुयात्
प्रीतिमन्योन्यतः कृत्वा कमला निश्चला गृहे वाणी च निवसेद्वक्त्रे सत्यं सत्येन संशयः यो धा
रयति पुण्यात्मा सर्वार्थसाधनाभिधं कवचं परमं पुण्यं सोपि पुण्यवतां वरः सर्वैश्वर्ययु
तो भूत्वा त्रैलोक्यविजयी भवेत् पुरुषो दक्षिणे बाहौ नारी वामभुजे तथा बहुपुत्रवती
भूत्वा वंध्यापि लभते सुतं ब्रह्मास्त्रादीनि शस्त्राणि नैव कृंतंति तत्तनुम् एतत्कवचम
ज्ञात्वा यो जपेत्परमेश्वरीं दारिद्र्यं परमं प्राप्य सोचिरान्मृत्युमाप्नुयात् इति श्रीरुद्रया
मले तंत्रे त्रिशक्त्याः सर्वार्थसाधनं नाम कवचं श्रीमत्त्रिपुरास्तोत्रं ॐ वराभीतिहस्ते
हिबाह्नप्रसन्ने शिवे स्वप्रसन्ने स्वशान्ते यापाविष्ट प्रसन्नास्य विश्वप्रकाशा स्वहृत्पद्मसिंहःपद्म
मध्ये गुरुं पूजयामि १ स्वर्के वह्निसंस्थे त्रिमूर्त्या ऽग्नजं हृत्पाशांके नमुकेत वाग्भवबीजे १
सर्वाणं भयेन प्रतिविशाकिस्त्रिये सौभगलेलमं तेनमामि २ नक्षत्रवायुमित्रेततो वामने
ऽस्वपाधाम विश्वनियोगे करके द्वितीये स्वबीजे स्वरश्रोणि वर्णं वदीये विभायास्त्रिये प्राप्नुवंति ३

विरिंचेत्तितिस्थंतनतोवामनेत्रंविंदुनादयुक्तं दिनेशाभवीजम् विभाव्यैकमम्मो हृतित्रि
लोकीजनपादीश्वरत्वंलभंतेनरेंद्राः ४ त्रयंसत्रियोज्वलत्तारिप्रियाये त्रिशक्त्याजपंतित्वदे
(त्वे)विभाव्य ननेषांत्रिभुवाक्प्रयोगंकरोतिस्मरालेंगणानोमदेहे श्रीलसत्तेषाम् ५ मुते
भारतीगद्यपद्यप्रवक्तानहिंसंतिहिंस्रास्त्वरालात्रसंति तदंद्विद्वयेभूषणोर्ध्मिताकारे
सिद्धयेद्र्यंहासत्नोमजेति ६ वनेपारिजाततद्रुमाणांपृथिव्यांसुवर्णप्रभायांमुनिसूहगेहे
स्मरेद्विस्त्रिकायेलसत्सिंहासनेपद्ममध्यस्थकेसंविचिंत्य ७ स्फुरत्कर्णिकायांपरंयोनिमु
ग्मेतदंतर्गतांमन्त्रहेमप्रभायाम् लसत्कुंडलामिंदुवक्त्रांत्रिनेत्रांस्फुरत्कंचुकेवाससुवस्त्राज
नस्राम् ८ महारत्नवज्रोल्लसद्राक्षदैः सपद्मद्वयंपाशकेकार्मकेच सुवर्णोरुशोणुष्प
बाणान्दधानांहृदंभूषणांसुमध्यांसकांचीम् ९ तुलाकोटिरम्यस्फुरत्पादपद्माकि
रीटायलंकारयुक्तांस्मरन्नाम् सितेवामवेदर्पणांतत्करेउंसमन्नंसकर्धूवहूर्णोपूताभिः
१० त्रिलोकीविधात्रींजगत्पालयित्रींजगत्क्षोभकर्त्रींजगन्मोहकर्त्रीम् सदानंदपूर्णोहका
रार्थवर्णोत्रिविंदुस्वरूपांविशालिंभजामि ११ विरंविनयिलातदेतत्स्वरूपांपुरोयेत्रमध्यम

श्री।
त सा।
२५१

256

मार्वहिमभक्त्या स्वयंभूकमलासनादिभिः पूजयित्वा च त्वद्वर्गान् सिद्धिं लभेत्वामरोपि ॥१२॥ श्रियं श्री
पतिर्माधवोमीश्वरं चरतिं कामदेवं षडङ्गेन सार्धं स्वयोनेन तथान्यायं त्वत्पुत्रो भवानी
क्रमात्पूजयित्वा न रेखाभवेत्वः ॥१३॥ निधिं वे च पाणौ हृदये मे विभाव्य त्वत्पूज्ये महेशी लती
लोकपालाः तदस्याणिततत्त्वं लायेषु पूजया भवत्याः प्रसिद्धिं लभेत्मानवोपि ॥१४॥ क्षिति
त्वं विभूषा तागजगत्त्वं स्थितिर्नवीन मायापि विश्वं जगन्मालिका च त्वमग्निस्तु कद्रोजगत्तो
भक्तिवीत्वमेश्वर्ययुक्ता जगद्व्यापुत्रूपा ॥१५॥ त्वमाद्याधिदेवी भवानीश्वरणेजगद्रूपसंगे
प्रेमदावेषमीषि निराधारगम्या भवस्येकरूपाणित्वमाकाशकल्या भवानि प्रसीद ॥१६॥
भवाम्भोधिमध्ये निपातैवसर्वे मनीनां च गावैम्तत्त्वे विवेकरोषि अतस्त्वां नमामि विदानंद
रूपे प्रकाशस्वरूपे भवानि प्रसीद ॥१७॥ जपित्वा भवन्नाम नामेदचेतो जपित्वेक लतेकवि
वेकरोति विविमस्वरूपं त्वदीयं त्रिलोकालमेङ्ले भवेत् भवानि प्रसीद ॥१८॥ त्वमाद्या प्रका
शिकात्वमाधेयरूपा जगद्व्यापिकात्वं जगद्व्याप्यरूपा अभावस्त्वमेका जगद्व्याप्यरूपा भ
भवाभिभावो भवानि प्रसीद ॥१९॥ ग्रणौत्वं विमस्त्वं त्वमेवासि विश्वम्भराः ॥२०॥

५४

स्तुतिका जगत्सां भवत्या विभासि तथापि त्वदीया गुणमादिशांति स्तुतिकर्तमेवं भवानि ।
प्रसीद २९ इदं स्तोत्रमाद्यं तद्गुणेन तायेपठंति त्रिसंध्यं कलौ तेन पित्वा नतेषामसाध्यं त्रिलो
कीजनानालभंते स्वरूपं भवानीप्रसादात् ३० इति त्रिपुरास्तोत्रम् अथ दुर्गाकवचं
ईश्वरउवाच शृणु देवि प्रवक्ष्यामि कवचं सर्वसिद्धिदम् पठित्वा पाठयित्वा च नरो मुच्ये
त संकटात् अज्ञात्वा कवचं देवि दुर्गामंत्रं च योजपेत् सनाप्नोति फलं तस्य परत्र नरके
व्रजेत् इदं गुह्यतमं देवि कवचं तव कथ्यते गोपनीयं प्रयत्नेन सावधानमनाः शृणु उमादे
वीशिरः पातु ललाटे शूलधारिणी चक्षुषी खेचरी पातु कर्णौ चत्वरवासिनी सुगंधा ना
सिकां पातु वदनं सर्वधारिणी जिह्वां च चंडिका देवी ग्रीवां सौभद्रिका तथा अशोकवासिनी
चेतो द्वौ बाहू वज्रधारिणी कंठं पातु महावाणी जगन्माता स्तनद्वयं हृदये ललितादेवी ।
उदरं सिंहवाहिनी कटिं भगवती देवी द्वावूरू विंध्यवासिनी कटिं भगवती देवी द्वावूरू
विंध्यवासिनी महाबला तु जंघे द्वे पादौ भूतलवासिनी एवं स्थितासि देवि त्वं त्रैलोक्यर
क्षणात्मिके रक्ष मां सर्वगात्रेषु दुर्गे देवि नमोस्तु ते इत्येतत्कवचं देवि महाविद्याफलप्रदम् यः

श्री॰
त सा॰
२५८

257

पठेत्स्यात्तस्य सर्वतीर्थफलं लभेत् यो मे मे कवचं देहे तस्य विघ्नं न कुत्रचित् ॥ ॥
न कुलेवादे सर्वत्र विजयी भवेत् सर्वत्र पूजामाप्नोति देवीपुत्र इव क्षितौ ॥ इति श्रीकुब्जिका
तंत्रे दुर्गाकवचं ॥ अथ दुर्गास्तोत्रं ॥ ईश्वर उवाच ॥ शतनाम प्रवक्ष्यामि शृणुष्व कमलानने
यस्याः प्रसादमात्रेण दुर्गा प्रीता भवेत्सती ॥ सती साध्वी भवप्रीता भवानी भवमोचिनी
आर्या दुर्गा जया चाद्या त्रिनेत्रा शूलधारिणी ॥ पिनाकधारिणी चित्रा चंडघंटा महात
पा मनोबुद्धिरहंकारा चित्तरूपा चिता चितिः ॥ सर्वमंत्रमयी सत्या सत्यानंदस्वरूपिणी
अनंता भाविनी भाव्या भव्याभव्या सदागतिः ॥ शांभवी देवमाता च चिंता रत्नप्रियास
दा सर्वविद्या दक्षकन्या दक्षयज्ञविनाशिनी ॥ अपर्णानेकवर्णा च पाटला पाटलावती
पट्टांबरपरीधाना कलमंजीररंजिनी ॥ अमेयाविक्रमी क्रूरा सुंदरी सुरसुंदरी ॥ वनदुर्गा
च मातंगी मतंगमुनिपूजिता ॥ ब्राह्मी माहेश्वरी चैंद्री कौमारी वैष्णवी तथा ॥ चामुंडा चैव वारा
ही लक्ष्मीश्च पुरुषाकृतिः ॥ विमलोत्कर्षिणी ज्ञाना क्रिया नित्या च बुद्धिदा ॥ बहुला बहुलप्रेमा स
र्ववाहनवाहना ॥ निशुंभशुंभहननी महिषासुरमर्दिनी ॥ मधुकैटभहंत्री च चंडमुंडविनाशिनी

सर्वासुरविनाशा च सर्वदानवघातिनी सर्वशास्त्रमयी सत्या सर्वास्त्रधारिणी तथा अने
कशस्त्रहस्ता च अनेकास्त्रस्य धारिणी कुमारी चैव कन्या च कैशोरी युवती यतिः अप्रौढा चै
व प्रौढा च वृद्धमाता बलप्रदा य इदं प्रपठेन्नित्यं दुर्गानामशताष्टकम् नासाध्यं विद्यते दे
वि त्रिषु लोकेषु पार्वति धनं धान्यं सुतं जायां हयं हस्तिनमेव च चतुर्वर्गं तथा चान्ते लभे
न्मुक्तिं च शाश्वतीम् कुमारीं पूजयित्वा तु ध्यात्वा देवीं सुरेश्वरीम् पूजयेत्परया भक्त्या पठेन्ना
मशताष्टकम् तस्य सिद्धिर्भवेद्देवि सर्वैः सुरवरैरपि राजानो दासतां यान्ति राज्यश्रियम
वाप्नुयात् गोरोचनालक्तककुंकुमेन सिंदूरकर्पूरमधुत्रयेण विलिख्य यंत्रं विधिना
विधिज्ञो भवेत्सदा धारयते पुरारिः भौमावस्यानिशाभागे चंद्रे शतभिषां गते विलि
ख्य प्रपठेत्स्तोत्रं स भवेत्संपदां पदम् इति श्रीविश्वसारतंत्रे दुर्गानामशताष्टकम् अ
थ महिषमर्दिनीकवचम् ईश्वर उवाच शृणु वक्ष्ये महेशानि कवचं सर्वकामदम् यस्य
प्रसादमात्रेण भवेत्तातात्सदाशिवः ओंकारं पूर्वमुच्चार्य मंत्री मंत्रस्य सिद्धये प्रपठेत्कव
चं नित्यं मंत्रवर्णस्य सिद्धये महिषमर्दिनीकवचस्य भगवान्महाकालऋषिः अनुष्टुप्छं

श्री·
त सा·
२५६

258

दः आद्याशक्तिः भगवती महिषमर्दिनी देवता चतुर्वर्गफलाप्तये विनियोगः क्लीं पातु
मस्तके देवी कामिनी कामदायिनी मकारः पातु मां देवी चतुर्भुजा महेश्वरी हिकारः पा
तु वदने हिंगुला सुरनायिका षिकारः पातु मां श्वेता जिह्वा वामपराजिता मकारः पा
तु मां देवी कामिनी कामदायिनी र्दिकारः पातु मां देवी सावित्री कलिनाशिनी निकारः
पातु मां निर्मोहा हृदये वामपार्श्वयोः नाभौ लिंगे गुदे कंठे कर्णयोः पार्श्वयोस्तथा शिखायां
कवचे पादे मस्तके जंघायुगे तथा सर्वांगे पातु मां स्वाहा सर्वशक्तिसमन्विता कामाद्या पा
तु मां स्वाहा सर्वांगे मर्दिनी शिरः दक्षा ह्रीं महाविद्या सर्वांगे पातु सततं मर्दिनी रक्तये
त्सदा प्रभा पातु महेशानी कनका पातु सर्वदा नंदिनी पातु सततं स्वप्रभा सर्वदावतु
विजया पातु सर्वत्र देशे गेने वशात्मयः शक्रयः पातु सततं मदा मम जया पातु सदा मृ
ला विशुद्धा पातु सर्वदा शक्तिमाः पांतु सततं सिद्धा पातु सदा मम सर्वत्र सर्वदा पा
तु देवी महिषमर्दिनी इति ते कथितं दिव्यं कवचं सर्वकामदं यत्र तत्र न वक्तव्यं गोपितं
व्यं प्रयत्नतः गोपितं सर्वतंत्रेषु विश्वसारे प्रकाशितं सर्वत्र सुलभा विद्या कवचं दुर्लभं महत्

शाठायभक्तिहीनाय निंदकाय महेश्वरि न्यूनांगे चातिरिक्तांगे कुरूपे मिथ्याभिमा
षिणि नत्सवं दर्शयेद्दिव्यं कवचं मत्रडलंभम् यत्र तत्र न वक्तव्यं शंकरेण च भाषितं दत्ता
तेभ्यो महेशानि नश्यंति सिद्धयः क्रमात् मंत्रः परो मुखो याति शापं दद्यात्सदा रुणम् अ
शुभं च भवेत्तस्य तस्माद्यत्नेन गोपयेत् गोरोचनाकुंकुमेन भूर्जपत्रे महेश्वरि लिखित्वा
शुभयोगेन बद्धैर्ध्रुवे धृतौ तथा श्राष्णमत्सिद्धियोगे वा ववे वा कौलवेपि वा वणिज्जे श्रव
णायां च रेवत्यां .... उत्तरात्रयपयोगेषु तथा पूर्वात्रयेषु च अश्विन्यां वा वरो
हिण्यां हस्ते यानमसीनि थौ अष्टम्यां वा चतुर्दश्यां सप्तम्यां वा पंचमी तिथौ कृष्णे वा पूर्णि
मायां वा निशायां शांतवेश्मवा एकलिंगे श्मशाने वा शून्यागारे शिवालये गुरुणा वै
स्नवैर्वापि स्वयंभूकुसुमैस्तथा शुक्रैर्वा रक्तकुसुमैश्चंदनैः रक्तसंयुतैः शावांगारैश्चि
तावह्नौ लिखित्वा धारयेत्सुतः तस्य सर्वार्थसिद्धिः स्यात् शंकरेण च भाषितम् कुमारी
पूजयित्वा तु देवीहृतं निवेद्य च पवित्राभोजयेद्विप्रान्वेनवा त्वेदपारगान् आवेदक
उपाख्याने कुमार्यैच दिनत्रयम् तदा परे त्महारत्नाकवचं सर्वकामदम् नायपयोव्यापय

श्री:
मम
२५५

259

ल्लस्य दुःस्वप्नो कभयं क्वचित् वादी मूको भवेद् दृष्ट्वा राजा च सेवकायते मासमेकं पठेद्य
स्तु प्रत्यहं नियतः शुचिः दिव्या भवेद् विद्या शीर्वाणीश्वाक्तिपरायणः षट्सहस्रप्रमाणेन
प्रत्यहं प्रजपेत्सदा षण्मासैर्वा त्रिभिर्मासैः खेचरो भवति ध्रुवं अपुत्रो लभते पुत्रमधनो
धनवान्भवेत् अरोगी बलवांश्चैव राजा च दासतामियात् रजस्वला भगो निस्पंजपे
द्धि यो षण्मासैर्वा त्रिभिर्मासैः खेचरो भवति ध्रुवम् अपुत्रो लभते पुत्रमधनो धनवा
न्भवेत् अरोगी बलवांश्चैव राजा च दासतां तु विधानतः पठेद्यः कुरुते धीमान्स एव श्री
महाशिवः इति श्रीविश्वसारे तन्त्रे महिषमर्दिनीकवचं अथ महिषमर्दिनीस्तोत्रं मन्त्रितेवत्वं
डि चूर्णितउग्राचारप्रचंडमण्डरैर्वैरदारयप्रभृति दुष्टरदखोहोमि मम्मापदः तेनायेनिरूप दुर्गौति
रूपमश्रीपादपद्मा दृत्वा प्रामानंदवमात्तिवेममममनोहंसमच्छिवनंदन् १ हिवाचेडि हिरण्यपदार
णपदृशोदामहस्तांगुलिस्फायमानखमेक मोदपाटाटोपं सिंहस्कवाः मानत्वम स्वपाश
पेषणपदृश्रीपादमंमेविनीमेयं तेकरवैविरणंकिमदभिभीतिर्भवेत्सेविनः २ चंडिखडिषयोनर
तरपदं श्रोत्रं नरेवेद्रतेतमतेप्रकषप्रकृतस्वगतेत्राणादिभिर्गीयते तस्मादेविसमस्तदैवतमयामारेकपामस्त
रक्षीमस्मादपयोजयुं भनपदंमामयसंभावय

सत्रिंदायदिवास्त्वत्कुलपथ्याचाराहृदंमास्त्वयीकार्तिःकेशवकौशिकार्चनवरीनौवा
स्त्वमन्महिदिपिचीतत्वब्रह्महरिस्मरादिकृतभेदैस्मादिसेवास्मदेश्रीमत्पादपयोजचिंतना
विधौचित्तेमदेवास्त्वतः ४ निर्दिष्टोस्मियदित्वदीयपदयुक्ष्वीपराभावनानिर्दिष्टस्य
त्वदाममायिविमलेकिंवास्त्वमिथ्यादिना तस्मादेविद्दृष्याभवोचिततत्रश्रीपादपद्मद्व
योमविश्रैत्ततसंपदस्मरतप्राणेसुविस्तृतताम् ५ आत्मानेपरिविभ्रमभूतपतिरपुत्मा
दमामादितःस्मारेजीवनरत्नणेसचक्रतीनेवास्तिविश्वरूपप्रभुः देवाहिसुतर्वेदर्वेदत्व
वनप्राणास्त्वत्वावास्त्वजन्मायीपूर्णाभवत्सदैककमलामोदेननाम्नादितः ६ आक्रमोत्त
रनादिमोहजलधिव्याहारब्रह्माविलब्रह्मानंदरमानिरेकविवशस्त्वातेत्सवेसादरा
अस्माकेसुरहेदनिर्भरमनस्तापाभिभूतत्वमश्रीमङ्क्षिरसातिडुर्दिनपरेवाहःसदा
सर्वत ७ त्वत्पादस्फुरदंशुजालजनं.... चार्वेडोंशुकोटिस्फुरत्स्वांतपातनिसारिनिर्म
लचिदानंदत्रयंदैवतम् सर्गानवस्तृजतेस्थितिवितन्वतेसंहृतिंपुनर्लेपतेप्राज्ञिज्ञोगनन
नीलनीरदमहस्त्विषेसदैवास्त्वतः ९ योंऽक्रमामरिषहललमिलसङ्गनेतिविधावन

श्री.
नं. सा.
२३.

ज्वलज्ज्वालोतः प्रसरन्नमलनशिवो दैन्यं समालेभते साडुर्गामवडुर्गीतिदुरालेभोतक
ज्ञामतीदेवनवैवदारुणपदेजीयाज्जयाख्यादिनी ९ ज्वलद्धेटकवामरीवलचलखड्गा
.... पृथ्वीपरमर्मज्ञतल्पशिलाम्बुवोह्लदलकाल्पातिनामापुर्यो मंस्कारान्यविमर्षि
वर्तितशिवंमासेपदुष्टातिवलग्रचंडविविष्टिताखिललमल्कोनातपाशोज्ज्वले १० कों
खल्कर्षविसमकालकलितश्रीरामसम्पादकौमायन्माहितिर्यमानतशिरःश्रेणो
तरालस्थले वर्त्तते वमपद्ममध्यकलितैरत्नश्लोमान्दभिः मवेवाक्रवणगनेरण
मदाघूर्णायमानोस्मरेत् ११ दुर्धापःक्रमसव्यवामकरयोस्त्रञ्जेवरंकर्टकोखेटवा
णपर्नुस्त्रिशूलमयदृह्मन्त्रंज्ञेदधानोशिवो पपामानीलवनोश्रृञ्जंतलचलमोडकूटह्र
लहीरास्फालनलमाकरालवदनोघोराट्टहासोज्ज्वा १२ वावेयेनवदेविमूर्तिमनव्यो
ध्यायेतिदुर्गादिभिः पाञ्चायैरपिपूजितोस्त्रिमववंत्तोमादिकेऋवंते रात्र्यंसंत्तजयःस्मर
र्णैविधिनाकाख्याम्टनकर्षणाल्लोभोज्वाटनमारणाद्दिकतिनोतेषांस्वयंजायते १३ लो
वैतेचरणारविंदयुगलध्यानावधानानमयामेजोड्डारऋलोपचाररचिनोगुरुक्तोपचारेयदि

260

ये शृण्वन्ति पठन्ति देवि सततं सा श्रीमोत्तकामादयस्तेषां हस्तगता भवन्ति जगतां मातर्नमस्ते जय १४
इति श्रीमहिषमर्दिनीस्तोत्रं समाप्तम् ॐ ह्रीं ह्रीं ह्रैं ह्रैं कठोरेणाशितकविक्रमताकल्पविस्मृ
शोभे भक्ष्याभक्ष्यानुकूलक्रुमतिवनदेवे विश्ववन्द्याङ्घ्रिपद्मे पद्मपद्मोपविष्टप्रणतजनमनो
मोदसम्पादयित्रि प्रोत्सर्पज्ज्ञानकूटे हरिनिजदयिते देवि संसारसारे १ ऐं ऐं ऐं इष्टमन्त्रे
कमलभवमुखाम्भोजभूतिस्वरूपे रूपारूपप्रकाशे सकलगुणमये निर्गुणे निर्विका
रे न स्थूले नातिसूक्ष्मेऽप्यविदितविभवे नापि विज्ञाततत्त्वे विश्वे विश्वान्तराले सुरवरनमि
ते निष्कले नित्यशुद्धे २ ह्रीं ह्रीं ह्रीं जापतुष्टे हिमरुचिमकुटे वल्लकीव्यग्रहस्ते मातर्मातर्न
मस्ते दह दह जडतां देहि बुद्धिं प्रशस्ताम् विद्ये वेदान्तगीते श्रुतिपरिपठिते मोक्षदे मु
क्तिमार्गे मार्गातीतस्वभावे भव मम वरदा शारदे शुभ्रहारे ३ धीं धीं धीं धारणाख्ये धृतिम
तिनुतिभिर्नामभिः कीर्तनीये नित्येऽनित्ये निमित्ते मुनिगणनमिते नूतने वै पुराणे पुण्ये
पुण्यप्रवाहे हरिहरनमिते नित्यशुद्धे सुवर्णे मातर्मात्रार्धतत्त्वे मतिमतिदे माधवप्रीतिदा
ने ४ ह्रीं क्ष्रीं धीं ह्रीं स्वरूपे दह दह दुरितं पुस्तकव्यग्रहस्ते संतुष्टाकारचित्ते स्मितमुखि विम

श्री॰
त सा॰
२६१

261

भगेजं भिनिस्तंभविघ्ये मोहे मुग्धप्रवाहक्रमममविमतिर्यान्त विध्वंसमीक्षे गीर्गीर्वाग्भा
रतीत्वेकविहृघरसना सिद्धिदा सिद्धसाध्या ५ स्तौमि त्वां त्वां च वंदे भज मम रसनां मा कदा
दाविरमजेषाः मामे बुद्धिर्विरुद्धा भवतु न च मनो देवि मे यातु पापं मामे दुःखं कदाचि
द्विपदि च मम मयेष्यास्तु मेनाकुलत्वं शास्त्रे वादे कवित्वे प्रसरतु मम मधीर्मास्तु कुंठा कदा
चित् ९ इत्येतैः श्लोकमुख्यैः प्रतिदिनमुषसि स्तौति यो भक्तिनम्रो वाणीं वाचस्पतेरप्य
विमतविभवो वाक्पटुर्मृष्टकंठः सस्यादिष्टार्थलाभी सुतमिव सततं पाति तं सा च देवी सौ
भाग्यं तस्य लोके प्रभवति कविता विघ्नमस्तं प्रयाति ब्रह्मचारी व्रती मौनी त्रयोदश्यां निरा
मिषः सारस्वतो नरः पाठाद्यस्याप्यादिष्टलाभवान् ८ पक्षद्वये पि यो भक्त्या त्रयोदश्येकवि
शतिम् अविच्छेदं पठेद्धीमान् ध्यात्वा देवीं सरस्वतीं ९ शुक्लां वरयरां देवीं शुक्लाभर
णभूषितां वांछितं फलमाप्नोति स लोके नात्र संशयः १० इति श्री सारस्वती स्तोत्रम्
श्रीगणेशस्तोत्रम् ॐकारमाद्यं प्रवदंति संतो वाचः श्रुतीनामपि यं गृणंति गजाननं दे
वगणानतांघ्रिं भजेहमर्धेंदुकृतावतंसं १ पादारविंदार्चनतत्पराणां संसारदावा-

५४.२

नलभंगदक्षम् निरंतरं निर्गतदानतोयैस्तं नौमि विघ्नेश्वरमंबुदाभम् २ कृतोगराणेन वा-

केऽकमेनमत्तालिमालोमदयैकलग्नाम् निवारयंतं निजकर्णतालैः कोविस्मरेत्पुत्रमनंगश-

त्रोः ३ शंभोर्जटाजूटतटनिवासिगंगाजलं समानीय करांबुजेन लीलाभिरारात्किलमर्चयं-

तं गजाननं भक्तिपुत्ताभजेति ४ कुमारमुक्तो पुनरात्महेतोः पयोधरौ पर्वतराजपुत्र्याः ।

प्रक्षालयंतं करशीकरेण मुग्धाननं नागमुखं भजामि ५ त्वयासमुद्धृत्यगजास्यहस्तं ये-

शीकराः पुष्करंध्रमुक्ताः व्योमांगने ते विचरंति ताराः कलात्मनोमुक्तिकतत्वभासः ६

क्रीडारते वारि निधौ गजास्ये वेलामतिक्रामति वारिपूरे कल्पावसाने परिचिंत्य देवाः

कैलासनाथं स्तुतिभिः स्तुवंति ७ नागाननेनागकृतोत्तरीये क्रीडारते देवकुमारसंघैः

त्वयि स्वतंत्रं कालगतिं विहाय तौ प्रापतः कंदुकतामिनेंदू ८ मदोल्लसत्पंचमुखैरजस्रम

ध्यापयंतं सकलागमार्थान् देवानृषीन्भक्तजनैकमित्रं हेरंबमर्कारुणमाश्रयामि ९

पादांबुजाभ्यामतिवामनाभ्यां कृतार्थयंतं कृपया धरित्रीम् अकारणं कारणमाप्तवाचां

तं नागवक्त्रं न जहाति चेतः १० येनार्पितं सत्यवतीसुताय पुराणमालिख्य विषाणको

श्री॰
ने सा॰
२६२

ग्रा तं चंद्रमौलेस्तनयं तपोभिराराध्यमानं दयनं भजामि ११ पदेष्कृती नामपदेप्ली-
लावतारं परमेष्ठभूमेः नागात्मको वा पुरुषात्मको वेत्यमेयमाद्यं भज विघ्नराजं १२
पाशांकुशौ भग्नरदं त्वभीष्टं करैर्दधानं करसंध्रमुक्तैः मुक्ताफलाभैः पृथुशीकरौघैः
सिंचंतमंगं शिवयोर्भजामि १३ अनेकमेकं गजमेकदंतं चैतन्यरूपं जगदादिबीजं
ब्रह्मेति यं वेदविदो वदंति तं शंभुसूनुं शरणं भजामि १४ स्वांकस्थिताया निजवल्ल-
भाया मुखांबुजालोकनलोलनेत्रं स्मेराननाब्जं मदवैभवेन भद्रं भजे विश्वविमोहनं-
तं १५ ये पूर्वमाराध्य गजाननं त्वां सर्वाणि शास्त्राणि पठंति तेषां त्वत्तो न चान्यत्प्रतिपा-
द्यमेतत्तदस्मितत्तस्य समस्तमकल्यं १६ हिरण्यगर्भं जगदीशितारं ऋषिं पुराणं विभुमीड-
लेख्यं गजाननं यं प्रवदंति संतस्तं कालयोगैस्तमहं प्रपद्ये १७ वेदांतगीतं पुरुषं भजेऽह-
मात्मानमानंदघनं हृदिस्थं गजाननं यन्महसा जनानां विघ्नांधकारो विलयं प्रयाति १८
शंभोः समालोक्य जटाकलापे शशांकखंडं निजपुष्करेण स्वभग्नदंतं प्रविचिन्त्य मौग्ध्यादा-
कृष्टकामः शिवमाततान १९ विघ्नार्गलानां विनिपातनार्थं यं नारिकेलैः कदलीफलाभैः प्रवादयं

स्तुतीनां॰

262

तं मदवारणास्यं शाम्भवं नेत्रोभीष्टमहं भजे तम् यस्यैव नैकैर्वक्त्रमिलन्त्योभिरागायमाधेमज
गजवक्त्रम् स्तुत्वानयायेविधिनास्तुवंति ते सर्वलक्ष्मीनिधयो भवंति २९ इति गणेशस्तवः
समाप्तः अथ गणेशकवचम् ईश्वर उवाच शृणु वक्ष्यामि कवचं सर्वसिद्धिकरं प्रिये पठित्वा
धारयित्वा च मर्त्यो ते सर्वसंकटात् अज्ञात्वा कवचं देवि गणेशस्य मनुं जपेत् सिद्धिर्न जायते
तस्य कल्पकोटिशतैरपि ॐ आमोदश्च शिरः पातु प्रमोदश्च शिखोपरि सम्मोदो भ्रूयुगे पातु
भ्रूमध्ये च गणाधिपः गणक्रीडश्चक्षुर्युग्मं नासायां गणनायकः गणक्रीडान्वितः पातु
वदने सर्वसिद्धये जिह्वायां सुमुखः पातु ग्रीवायां दुर्मुखस्तथा विघ्नेशो हृदये पातु विघ्न-
नाथश्च वक्षसि गणानां नायकः पातु बाहुयुग्मं सदा मम विघ्नकर्ता च उदरे विघ्नहर्ता
च लिंगके गजवक्त्रः कटिदेशे एकदंतो नितंबके लंबोदरः सदा पातु गुह्यदेशे ममारु-
णः व्यालयज्ञोपवीती मां पातु पादयुगे सदा जापकः सर्वदा पातु जानुजंघे गणाधिपः हा-
रिद्रः सर्वदा पातु सर्वांगे गणनायकः य इदं प्रपठेन्नित्यं गणेशस्य महेश्वरि कवचं सर्वसि-
द्धिदं सर्वविघ्नविनाशकम् सर्वसिद्धिकरं साक्षात्सर्वपापविमोचनम् सर्वसम्पत्प्रदं सा

सू॰
त॰सा॰
२११

263

स्तान्सर्वान्शत्रुक्षयंकरं ग्रहपीडाज्वरो रोगो ये चान्ये गुल्मकादयः पठनाच्छ्रवणाद्दस्य ना
शमायान्ति तत्क्षणात् पुनर्यान्मकं देवि कवचं सर्वपूजितम् ममो नास्ति महेशानि त्रैलो
क्यकवचस्य च हार्दि ह्यस्य महेशानि कवचस्य च भूतले किमन्यैर्बहुदालापैर्यैर्यत्रायुः क्षयता
गियात् इति श्रीहरिद्रागणेशकवचं अथ सूर्यकवचं श्रीसूर्य उवाच साम्ब साम्ब महाबाहो
शृणु मे कवचं शुभं त्रैलोक्यमंगलं नाम कवचं परमाद्भुतं यज्ज्ञात्वा मंत्रवित्सम्यक् फ
लमाप्नोति निश्चितं यद्धृत्वा च महादेवो गणाधिपस्सर्वेषां पालकस्तथा एवमिन्द्राद
यः सर्वे सर्वैश्वर्यमवाप्नुयुः कवचस्य ऋषिर्ब्रह्मा छन्दोनुष्टुबुदाहृतं श्रीसूर्यो देवता
चात्र सर्वदेवनमस्कृता आरोग्यवयशोमोक्षे विनियोगः प्रकीर्तितः प्रणवो मे शिरः
पातु ह्रीं घृणिर्मे पातु भालकं सूर्योव्यान्नयनद्वंद्वमादित्यः कर्णयुग्मकं अष्टाक्षरी महा
विद्या सर्वाभीष्टप्रदायिका ह्रींबीजं मे मुखं पातु हृदयं भुवनेश्वरी चन्द्रबीजं विसर्गा
ढ्यं पातु मे गुह्यदेशकम् अक्षरोसौ महामंत्रः सर्वतंत्रेषु गोपितः ॥ ॥
शिवो वह्निसमायुक्तो वामाक्षिबिन्दुभूषितः ॥ ॥ ॥

पवमानस्तोममहामंत्रः श्रीसूर्यस्य प्रकीर्तितः गुह्याद्गुह्यतरो मंत्रो वांछाचिंतामणिः स्मृतः
शीर्षादिपादपर्यंतं सदापातु मनूत्तमः इति ते कथितं दिव्यं त्रिषु लोकेषु दुर्लभम् श्रीप्रदं
कांतिदं नित्यं धनारोग्यविवर्धनम् कुष्ठादिरोगशमनं महाव्याधिविनाशनम् त्रिसंध्यं यः
पठेन्नित्यमरोगी बलवान्भवेत् बहुना किमिहोक्तेन यद्यन्मनसि वर्तते तत्तत्सर्वं भव-
त्येव कवचस्य धारणात् भूतप्रेतपिशाचाश्च यक्षगंधर्वराक्षसाः ब्रह्मराक्षसवेता-
लानैव द्रष्टुमपि क्षमाः दूरादेव पलायंते तस्य संकीर्तनादपि भूर्जपत्रे समालिख्य रोच-
नागुरुकुंकुमैः रविवारे च संक्रांतौ सप्तम्यां च विशेषतः धारयेत्साधकश्रेष्ठः त्रैलोक्यवि-
जयी भवेत् त्रिलोहमध्यगं कृत्वा धारयेद्दक्षिणे भुजे शिखायामथवा कंठे सोपि सूर्यो
न संशयः इति ते कथितं सांब त्रैलोक्यमंगलाभिधम् कवचं दुर्लभं लोके तव स्नेहात्प्र-
काशितम् अज्ञात्वा कवचं दिव्यं जपेत्सूर्यमनूत्तमम् सिद्धिर्न जायते तस्य कल्पको-
टिशतैरपि इति श्रीब्रह्मयामले त्रैलोक्यमंगलं नाम सूर्यकवचं समाप्तम् अथ श्रीरामकव-
चम् सनत्कुमार उवाच ध्यानं नीलोत्पलश्यामं रामं राजीवलोचनम् जानकीलक्ष्मणो

श्री०
र मा०
२६४

264

पेतं जटामुकुटमंडितम् सासितूणधनुर्बाणपाणिं नक्तंचरांतकम् स्वलीलया जगत्त्रातुम्
आविर्भूतमजं विभुम् रामरक्षां पठेत्प्राज्ञः पापघ्नीं सर्वकामदाम् अस्य श्रीरामकवचस्य
बुधकौशिकऋषिः अनुष्टुप्छंदः श्रीरामचंद्रो देवता श्रीरामप्रीत्यर्थं मंत्रपाठे विनियो
गः शिरो मे राघवः पातु भालं दशरथात्मजः कौसल्येयो दृशौ पातु विश्वामित्रप्रियः श्रु
ती घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सलः जिह्वां विद्यानिधिः पातु कंठं भरतवंदि
तः स्कंधौ दिव्यायुधः पातु भुजौ भग्नेशकार्मुकः करौ सीतापतिः पातु हृदयं जामदग्न्य
जित् वक्षः पातु कबंधारिः स्तनौ गीर्वाणवंदितः पार्श्वे रघुपतिः पातु कुक्षिं मैथिला
नंदनः मध्यं पातु खरध्वंसी नाभिं जांबवदाश्रयः गुह्यं जितेंद्रियः पातु पृष्ठं पातु रघू
द्वहः सुग्रीवेशः कटिं पातु सक्थिनी हनुमत्प्रभुः ऊरू रघूत्तमः पातु रक्षःकुलवि
नाशकृत् जानुनी सेतुकृत्पातु जंघे दशमुखांतकः पादौ विभीषणश्रीदः
पातु रामोऽखिलं वपुः एतां रामबलोपेतां रक्षां यः सुकृती पठेत् स चिरायुः
सुखी पुत्री विजयी विनयी भवेत् पातालभूतलव्योमचारिणश्छद्मचारिणः

नद्रष्टुमपिशक्तास्तेरक्षितंरामनामभिः रामेतिरामभद्रेतिरामचंद्रेतिवास्मरन् नरो
नलिप्यतेपापैःभुक्तिंमुक्तिंचविंदति जगज्जैत्रैकमंत्रेणरामनाम्नाभिरक्षितम् यःकं
ठेधारयेत्तस्यकरस्थाःसर्वसिद्धयः भूर्जपत्रेलिमांविद्यांगंधचंदनचर्चिताम् कृत्वावैधा
रयेद्यस्तुसोभीष्टफलमाप्नुयात् अव्याहताज्ञःसर्वत्रलभतेजयमंगलम् आदिष्टवा
न्यथास्वप्नेरामरक्षामिमांहरिः तथालिखितवान्प्रातःप्रबुद्धोबुधकौशिकः रामोदाशर
थिःशूरोलक्ष्मणानुचरोबली काकुत्स्थःपुरुषःपूर्णःकौसल्येयोरघूत्तमः पत्नीनौव
द्धतिविशिष्टौकाकपक्षधरौशुभौ वीरौमांपथिरक्षेतांतावुभौरामलक्ष्मणौ पुत्रौदशर
थस्यैतौभ्रातरौरामलक्ष्मणौ शरण्यौसर्वसत्वानांश्रेष्ठौसर्वधनुष्मताम् तरुणौरू
पसंपन्नौसुकुमारौमहाबलौ पुंडरीकविशालाक्षौपीतकृष्णाजिनांबरौ फलमूला
शिनौदांतौतापसौब्रह्मचारिणौ सन्नद्धःकवचीखड्गीचापबाणधरोयुवा गच्छन्मनो
रथोस्माकंरामःपातुसलक्ष्मणः रक्तःकमलनिर्हतारौत्रायेतांनौरघूत्तमौ आत्तसज्जध
नुषाविषुस्पृशावक्षयाशुगनिषंगसंगिनौ रक्षणायममरामलक्ष्मणावग्रतःपथिस

श्री.
रा.सा.
२६५

265

देवगणार्चिताय अथ तन्मन्त्रसिद्धो मे एकुतोगकर्द्दयजः पार्श्वयोर्लक्ष्मणश्चैतौ सशरौ
रामलक्ष्मणौ आपादमपहर्तारं दातारं सर्वसम्पदाम् गुणाभिरामं श्रीरामं भूयो भूयो
नमाम्यहं दक्षिणे दक्षिणे पत्नी वामतो जानकी शुभा पुरतो मारुतिर्यस्य तं नमामि
रघूद्वहं वेदान्तवेद्यो यज्ञेशः पुराणः पुरुषोत्तमः जानकीवल्लभः श्रीमानप्रमेयपराक्र
मः एतानि मम नामानि मद्भक्तो यः सदा पठेत् अश्वमेधायुतं पुण्यं संप्राप्नोति न सं
शयः इति श्रीरामकवचं समाप्तम् अथ श्रीरामनामशताष्टकम् श्रीवेदव्यास उवाच
शृणु गाङ्गेय वक्ष्यामि रामस्याद्भुतकर्मणः नामाष्टकशतं पुण्यं त्रिषु लोकेषु विश्रुतं ।
नातःपरतरं गुह्यं त्रिषु लोकेषु विद्यते कैलासशिखरे रम्ये नानाद्रुमविचित्रिते एकाग्र
प्रयुतो भूत्वा विस्मयमाविष्ट भक्तितः उपविष्टं ततो भोलं पार्वती शंकरोऽब्रवीत् पार्वति हे
हिमवत्सार्धभोले भुवनवंदिते नमाम्यहं पार्वती देवी जगन्नाथा नामसहस्रकं ततो वस्तामयहं दे
वपुण्यतो भवतांश्च मो ततः स्तां पार्वती प्राह ब्रह्मसत्यश्च मे श्वरः यस्यासि हि कतपुण्यानि विलभ
ता सि पार्वति दुर्लभा वैष्णवी भक्ति भूमा ये ये विनेस्पृति रकारादीनि नामानि शृणुतो मम पार्वति

मनःप्रसन्नतामेतिरामनामाभिशंकया रमंतेयोगिनोनंतेसत्यानंदेचिदात्मनि इतिरा-
मपदेनासौपरब्रह्माभिधीयते रामरामेतिरामेतिरमेरामेमनोरमे सहस्रनामभिस्तु-
ल्यंरामनामवरानने रामेत्युक्त्वामहादेविपतिनामसहस्रसंस्थिता पश्चाच्छ्रीमहादेवंप्रीति
प्रवनमानसा सहस्रनामभिस्तुल्यंरामनामत्वयोदितम् तस्यान्यान्यपिनामानिमेति-
वैष्णवाग्रहिषः कथ्यतांममदेवेशतत्त्वमेप्रीतिकत्वमा श्रीशंकरउवाच लौकिकावैदिकाः
सर्वायेकेचित्संतिपार्वति नामानिराममंत्रस्यसहस्रंतेषुचाधिकम् तेषुचात्यंतपुण्य
हिनामग्रामसहोत्तरंप्राते विलोक्यैकैकनामानिसर्ववेदाधिकंफलम् तादृक्नामसहस्रेणि
रामरामष्टोत्तरमतम् जपतःसर्ववेदांश्चसर्वमंत्रांश्चपार्वति तस्मात्कोटिगुणंपुण्यंराम-
नाम्नैवलभ्यते अस्यश्रीरामचंद्रस्याष्टोत्तरशतनाम्नां ईश्वरऋषिः अनुष्टुप्छंदः श्रीरामचं-
द्रोदेवता श्रीरामप्रीत्यर्थेजपेविनियोगः श्रीरामरामभद्रश्चरामचंद्रश्चशाश्वतः राजी-
वलोचनःश्रीमान्राजेंद्रोरघुपुंगवः जानकीवल्लभोजैत्रोजितामित्रोजनार्दनः विश्वामि-
त्रप्रियोदांतःशरणत्राणतत्परः वालिप्रमथनोवाग्मीसत्यवाक्सत्यविक्रमः सत्यव्रतोव्र-

श्री॰
त सा॰
२३३

266

नफलः सदा हनुमदाश्रयः कौसलेयः खरध्वंसी विराधवधपंडितः विभीषणपरित्राता
दशग्रीवशिरोहरः सप्ततालप्रभेत्ता च हरकोदंडखंडनः जामदग्न्यमहादर्पदमनस्ता
टकांतकः वेदांतसारो वेदात्मा भवरोगस्य भेषजः दूषणत्रिशिरोहंता त्रिमूर्तिस्त्रिगुणाश्र
यी त्रिविक्रमस्त्रिलोकात्मा पुण्यचारित्रकीर्तनः त्रिलोकरक्षको धन्वी दंडकारण्यपुण्य
कृत् अहल्यापावनश्चैव पितृभक्तो वरप्रदः जितेंद्रियो जितक्रोधो जितलोभो जगद्गुरुः
ऋक्षवानरसंघाती चित्रकूटसमाश्रयः जयंतत्राणवरदः सुमित्रापुत्रसेवितः सर्वदेवा
धिदेवश्च मृतवानरजीवनः मायामारीचहंता च महाभोगो महाभुजः सर्वदेवस्तुतः सौ
म्यो ब्रह्मण्यो मुनिसंस्तुतः महायोगी महोदारः सुग्रीवेप्सितदायकः सर्वपुण्याधिकफ
लो स्मृतसर्वाघनाशनः आदिपुरुषो महापुरुषः परमः पुरुषः पुण्योदयो दयासारः पुराणपु
रुषोत्तमः स्मितवक्त्रो मितभाषी पूर्वभाषी च राघवः अनंतगुणगंभीरो धीरोदात्तगुणोत्त
मः मायामानुषचारित्रो महादेवाभिपूजितः सेतुकृज्जितवारीशः सर्वतीर्थमयो हरिः
श्यामांगः सुंदरः शूरः पीतवासा धनुर्धरः सर्वयज्ञाधिपो यज्वा जरामरणवर्जितः ।।

परमात्मा परंब्रह्म सच्चिदानंदविग्रहः परंज्योतिः परंधाम पराकाशः परात्परः परेशः पा
रगः पारः सर्ववेदात्मकः शिवः ॐ तत्सदित्येतद्रामभद्रस्य नाम्नामष्टोत्तरं शतम् गुह्याद्गु
ह्यतरं देवि तव प्रीत्या प्रकीर्तितम् यः पठेच्छृणुयाद्वापि भक्तियुक्तेन चेतसा समस्तैः प्रमुच्य
ते पापैः कल्पकोटिशतैरपि जलानि स्थलतां यांति शत्रवो यांति मित्रताम् राजानो वश्यतां
यांति वह्नयो यांति शीतताम् आनुकूल्यं च भूतानि स्थैर्यं यांति चला श्रियः अनुग्रहं ग्रहा यां
ति शांतिं यांत्युपद्रवाः पठतो भक्तिभावेन नूनस्पर्शनिसंभवे यः पठेत्परया भक्त्या तस्य
वश्यं जगत्त्रयम् यद्यत्कामयते चित्ते तत्तदाप्नोति कीर्तनात् यः पठेद्रामचंद्रस्य नाम्नामष्टो
त्तरं शतम् पुण्यकालेषु सर्वेषु पठन्नानंत्यमाप्नुयात् ज्ञानेनापि चक्रवाणोन्न सपापेन
लिप्यते सर्ववेदेषु तीर्थेषु दानेषु च तपस्सु च तत्फलं कोटिगुणितं स्तवेनानेन लभ्यते
ग्रहणकालेषु सर्वेषु पठेन्नामशताष्टकम् कल्पकोटिसहस्राणि कल्पकोटिशतानि च
वैकुंठवासमाप्नोति दशपूर्वैर्दशापरैः रामं दूर्वादलश्यामं पद्माक्षं पीतवाससम् स्तु
वंति नामभिर्दिव्यैर्न ते संसारिणो नराः रामाय रामभद्राय रामचंद्राय वेधसे रघुनाथा

श्री॰
न मा॰
२६७

267

यनाथायमीनायाः पतयेनमः इमंमंत्रंमहादेविजपन्नेवदिवानिशं सर्वपापविनिर्मुक्तो
विष्णुसायुज्यमाप्नुयात् इत्येतद्रामभद्रस्यमाहात्म्यंवेदसंमितं कथितंतववरारोहेयत्नतस्त्वं
वैष्णवोत्तमः वंदामहेमहेशानेहरकोदंडखंडनं जानकीहृदयानंदवर्द्धनंरघुनंदनम्
इतिश्रीपद्मपुराणेदेवीश्वरसंवादेश्रीरामचंद्रस्तोत्रंसमाप्तं अथविष्णुस्तोत्रं आदौयवेदाः
सकलाःसमुद्गाविहस्तपरिपूर्णमदंष्ट्रे दत्तागतायेनपितामहायविलेतुमाद्यंभजमत्स्यरूपं
१ दिव्यामृतार्थेमथितेमहाब्धौदेवासुरैर्वासुकिमंदराद्यैः भूमेर्महावेगविचूर्णितायाः
स्नकूर्ममाधारगतंनमामि २ सामेद्रकांचीसरिदुत्तरीयावसुंधरामेरुकिरीटभारा द
नाग्रतोयेनसमुद्धृतामूलमादिकोलंशरणंप्रपद्ये ३ भक्तार्तिभंगंतमयाविधायस्तंभा
नरालाउद्धितोनृसिंहः दिंदुप्रगाणोनिषितैर्नखाग्रैर्विदारयस्तंनचविस्मरामि ४ व
तस्समुद्गामभरणायविशीर्णमायनालेववरणस्यतस्य एकस्यनामस्यपदैसराणोत्रिवि
क्रमंसर्वगतंनमामि ५ त्रिसप्तवारंन्यपतीविहत्ययस्तर्पणंरक्तमयेपितृ
भ्यः चकारदोर्दंडबलेनसम्यक्तमादिसूरंप्रणमामिविप्रम् ६ ऊर्ध्वेरघू ॥

नोऽस्मभवाय्यनन्तविधायसेतुंजलधेर्नलान्तः लंकेश्वरंयःशमयांचकारसीतापतिंप्रणा
मामिभक्त्या ७ हलेनसर्वान्सुरवान्विकृष्यचकारचूर्णंस्वहलप्रहारैः यःकृष्णमासाद्य
बलेबलीयान्भक्त्याभजेतंबलराममद्य ८ बुद्धावतारेणमहावतारेजनेतंसंभावयन्
वीवरविलक्षवेषाम् चकारयःपापहरमतोऽक्षकल्पंतमूलभूतंप्रणतोस्मिबुद्धम् ९ कल्पा
वसानेत्वतिविलैःखड्गैःसैनःसंपातदृष्यामासनिमेषमात्रात् यस्तेजसानिर्दहतानिभीमोविष्णा
त्मकंतंतुरगेभजामः १० योवेदहस्तवकेशवादोसरोजेदोर्भिर्दधानेगतकंडरापितुहम् श्रीवा
त्सविशेषनगदात्सृमूलेतमालनीलंहृदिविश्वमीडे ११ लीलांबुधौशेषविशेषतल्पेशाया
नमेतःस्मितशोभिवक्त्रम् उत्फुल्लनेत्रांबुजमंबुदाभमायंकृतीनामसहस्रनामि १२
श्रीणएवेदनयाल्लमानगम्माध्यजगन्मयम् धर्मार्थकाममोक्षाणांमामस्येत्कप्रोत्नमम्
इतिश्रीविष्णुस्तोत्रंसमाप्तम् अथश्रीहरिस्तोत्रम् प्रसीदभगवन्मायमज्ञानान्कवीता
त्मने तवांघ्रिपंकजरजोराशिणांभक्तिमुत्तमाम् अनप्रसीदभगवन्नस्मितस्फतिपंजरः
प्रप्रमेयप्रसीदास्मदुःखहस्तकपोतनम स्वसंवेदप्रसीदास्मज्ञानेदात्मत्रनामय प्रविगस्मा

श्री॰
त॰ स॰
२६५

268

रविश्वात्मन्प्रसीद परमेश्वर प्रसीदत्वंगतंगानो प्रसीदहृषीवृषोमन प्रसीदस्पुराणगंभी
रगंभीवाराणो महाफते प्रसीदव्यक्त विस्तीर्णविस्तीर्णनामगोचर प्रसीदस्मद्विजातीना
मेतत्वमंतर्यामिनो गुरुर्गरीयः सर्वेशः प्रसीदानोतदेहिनाम् जयमाधवमायात्मन्
यज्ञात्मतसर्गभृत् जयशोकविधतृ श्रीमतन्जयनंदकनंदन जयचक्रगदापाणेजयदेव
जनार्दन जयरत्नवराबद्धकिरीटक्रांतमस्तक जयपतिपतिक्षायानिरुद्धार्ककराक
रण नमस्तेनरकारातेनमस्तेमधुसूदन नमस्तेनलिनापांगन नमस्तेनरकांतक नमः
पापहरेशाननमः सर्वभयापह नमस्संभृतसर्वात्मन्नमस्संभृतकौस्तुभ नमस्तेन
यनातीतनमस्तेभयहारक नमोविभिन्नदेहाय नमःस्मर्तिपथातिग नमस्त्रिमूर्ति
भेदेनसर्गस्थित्यंतहेतवे विश्ववेविदग्धारातिजिष्णवेपरमात्मने चक्रभिन्नारिचक्राय।
चक्रिणेचक्ररूपिणे विश्वायविश्ववंद्यायविश्वभूतात्ममूर्तये नमोस्तुयोगिध्येयात्मन्नमस्ते
ध्यानरूपिणे भुक्तिप्रदायभक्तानांनमस्तेमुक्तिदायिने सृजतेद्रवतेवेष्टाध्यानपस्थानमस्त्रिगुण
देवेशाकर्मस्तवैमेभवेदारायणेतव इतिस्तवनजपार्वीभेदतोविश्वसृजातिपतत्कृदयकर्मोयत्स्वमेशीविष्णु
प

सावलसकलकामान्प्राप्य कृष्णांतरात्मा जननमृतिविमुक्तामाप्नुयान्मुक्तिमेति गोगोपगो-
पिकावीतं गोपालं गोष्ठगोप्रदम् गोपीवीज्यगोमहस्सैसैं नौमि गोकुलनायकम् प्रीणयेद्य
स्तु तया जगन्नाथं जगन्मयम् धर्मार्थकाममोक्षाणामाप्तये पुरुषोत्तमम् इति श्रीकृष्णस्तो-
त्रं समाप्तम् अथ श्रीगोपालस्तोत्रं नारद उवाच नवीननीरदश्यामं नीलेंदीवरलोचनम्
वल्लवीनंदनं वंदे कृष्णं गोपालरूपिणम् स्फुरद्बर्हदलोद्बद्धनीलकुंचितमूर्धजम् कदंब
कुसुमाबद्धवनमालाविभूषितम् गंडमंडलसंसर्गिचलत्कांचनकुंडलम् स्थूलमुक्ताफ
लोदारहारद्योतितवक्षसम् हेमांगदतुलाकोटिकिरीटोज्वलविग्रहम् मंदमारुतसंक्षो
भवल्गिताम्बरसंचयम् रुचिरौष्ठपुटन्यस्तवंशीमधुरनिस्वनैः लसद्गोपालिकाचेतो मो
हयंतं मुहुर्मुहुः वल्लवीवदनांभोजमधुपानमधुव्रतम् क्षोभयंतं मनस्तासां सस्मेरापा
ङ्गवीक्षणैः यौवनोद्भिन्नदेहाभिः संसक्ताभिः परस्परम् विचित्राम्बरभूषाभिर्गोपनारीभि
रावृतम् प्रभिन्नांजनकालिंदीजलकेलिकलोत्सुकम् योधयंतं क्वचिद्गोपान्व्याहरंतं ग
वांगणम् कालिंदीजलसंसर्गिशीतलानिलकम्पिते कदंबपादपच्छाये स्थितं वृन्दावने

श्री.
त सा.
२१५

269

क्वचित रत्नमूधरमेतत्र रत्नासनमधिग्रहं कल्पपादपमध्यस्थहेममंडपिकागते ।
वसंतकुसुमामोदसुरभीकृतदिङ्मुखे गोवर्धनगिरौरम्ये स्थितं रासरसोत्सुकं सव्यहस्ततलन्य
स्तगिरिवर्यातपत्रकं खंडिताखंडलोन्मुक्तमुक्तासारघनाघने वेणुवाद्यमहोल्लास
कृतहुंकारनिस्वनैः सवत्सैरूर्ध्वमुखैः शश्वद्गोकुलैरभिवीक्षितं कृष्णमेवानुगायद्भिस्तच्चे
ष्टावशवर्तिभिः दंडपाशोद्यतकरैर्गोपालैरुपशोभितं नारदाद्यैर्मुनिश्रेष्ठैर्वेदवेदांगपा
रगैः प्रीतिसुस्निग्धयावाचा स्तूयमानं परात्परम् य एवं चिंतयेदेवं भक्त्या संस्तौति मा
नवः त्रिसंध्यं तस्य तुष्टोसौ ददाति वरमीप्सितं राजवल्लभतामेति भवेत्सर्वजनप्रियः
अचलां श्रियमाप्नोति स वाग्मी जायते ध्रुवं इति श्रीगौतमतंत्रे नारदसंवादे श्रीगोपाल
स्तोत्रं समाप्तं अथ श्रीकृष्णकवचं भगवन्सर्वधर्मज्ञ कवचं यत्प्रकाशितं त्रैलोक्यमं
गलं नाम कृपया कथय प्रभो सनत्कुमार उवाच शृणु वक्ष्यामि विप्रेंद्र कवचं परमाद्भुतं ।
नारायणेन कथितं कृपया ब्रह्मणे पुरा ब्रह्मणा कथितं मह्यं परं स्नेहाद्वदामि ते अति
गुह्यतरं तत्त्वं ब्रह्ममंत्रौघविग्रहम् यद्धृत्वा पठनाद्ब्रह्मा सृष्टिं वितनुते ध्रुवम् ॥

यद्धृत्वा पठनात्स्मातिमहालक्ष्मीर्मेगङ्गाश्रयम् । पठनाद्धारणाच्छंभुः संहर्ता सर्वतत्त्ववित् त्रै
लोक्यजननोदुर्गा महिषादिमहासुरान् वधत्क्षोजवानेवपठनाद्धारणाद्यतः एवमिन्द्रा
दयः सर्वे सर्वैश्वर्यमवाप्नुयुः इदं कवचमत्यन्तगुप्तं कुत्रापि नो वदेत् शिष्याय भक्तियुक्ता
य साधकाय निवेदयेत् शठाय परशिष्याय दत्वा मृत्युमवाप्नुयात् त्रैलोक्यमंगलस्या
स्य कवचस्य प्रजापतिः ऋषिः छन्दश्च गायत्री देवो नारायणः स्वयम् धर्मार्थकाममो
क्षेषु विनियोगः प्रकीर्तितः ॐ प्रणवो मे शिरः पातु नमो नारायणाय च भाले पायान्ने
त्रयुग्ममष्टार्णो भुक्तिमुक्तिदः क्लीं पायाच्छ्रोत्रयुग्मं मे चैकार्णः सर्वमोहनः क्लीं कृष्णाय
सदाघ्राणं गोविन्दायेति जिह्विकाम् गोपीजनपदं वल्लभाय स्वाहाननं मम अष्टादशा
क्षरो मन्त्रः कण्ठं पातु दशाक्षरः गोपीजनपदं वल्लभाय स्वाहा भुजद्वयम् क्लीं ग्लौं क्लीं श्या
माङ्गाय नमः स्कन्धौ दशाक्षरः क्लीं कृष्णः क्लीं करौ पायात् क्लीं कृष्णायांगतोवतु हृ
दयं भुवनेशानः क्लीं कृष्णाय क्लीं स्तनौ मम गोपालायाग्निजायान्तः कुक्षियुग्मं सदावतु
क्लीं कृष्णाय सदा पातु पार्श्वयुग्ममनुत्तमः कृष्णगोविन्दकौ पातु स्मराद्यौ ङेयुतौ मनुः ।

श्री॰
त॰ सा॰
२७०

270

अष्टाक्षरः पातु नाभिं कृष्णेति द्व्यक्षरोऽवतु पृष्ठं क्लीं कृष्णकं कालं क्लीं कृष्णाय द्विठान्तकः स
क्थिनी सततं पातु श्रीं ह्रीं क्लीं कृष्णवह्वयम ऊरू सप्ताक्षरः पायात्त्रयोदशाक्षरोऽवतु श्रीं ह्रीं क्लीं
पदतो गोपीजनवल्लभपदं ततः भाय स्वाहेति पायुं मे क्लीं ह्रीं श्रीं च दशार्णकः जानुनी च स
दा पातु ह्रीं श्रीं क्लीं च दशाक्षरः त्रयोदशाक्षरः पातु जंघे चक्रगदाभृतः अष्टादशाक्षरो ह्रीं
श्रीं पूर्वको विंशदर्णकः सर्वांगं मे सदा पातु द्वारकानायको बली नमो भगवते पश्चाद्वा
सुदेवाय ततः परं ताराद्यो द्वादशार्णोयं प्राच्यां मां सर्वदावतु तारो नमो भगवते रुक्मिणी
वल्लभाय च स्वाहेति षोडशार्णोयं नैरृत्यां मां दिशि रक्षतु क्लीं हृषीकेशाय नमः पदं मां वरु
णोऽवतु अष्टादशार्णः कामान्तो वायव्ये मां सदावतु श्रीं मायाकामकृष्णाय गोविंदाय द्वि
ठो मनुः द्वादशार्णात्मको विष्णुरुत्तरे मां सदावतु वाग्भवं कामकृष्णाय ह्रीं गोविंदाय ततः प
दं श्रीं गोपीजनवल्लभाय स्वाहा हस्तौ स्मृतः द्वाविंशाक्षरो मंत्रो ममैशान्ये सदावतु का
लीयस्य फणामध्ये दिव्यं नृत्यं करोति तं नमामि देवकीपुत्रं नृत्यराजानमच्युतं द्वाविंशा
क्षरो मंत्रोऽप्यधो मां सर्वदावतु कामदेवाय विद्महे पुष्पबाणाय धीमहि तन्नोऽनंगः प्रचोदयात्

इति मां पातु चोर्ध्वतः ॥ इति ते कथितं ब्रह्मन् सर्वमन्त्रौघविग्रहम् । त्रैलोक्यमंगलं नाम क
वचं ब्रह्मरूपिणम् । ब्रह्मेशाश्रमवाधीशा नारायणमुखाच्छ्रुतम् । तव स्नेहान्मयाख्यातं प्र
वक्तव्यं न कस्यचित् । गुरुं प्रणम्य विधिवत्कवचं प्रपठेत्ततः । त्रिसकृद्वा यथाज्ञानं सोऽपि स
र्वतपोमयः । मन्त्रेषु सकलेष्वेव देशिको नात्र संशयः । शतमष्टोत्तरं चास्य पुरश्चर्याविधिः
स्मृतः । हवनादीन्दशांशेन कृत्वा तत्साधयेद्ध्रुवम् । यदि स्या ̎ चोन्सिद्धिः कवचो वि
ष्णुरेव भवेत्स्वयम् । मन्त्रसिद्धिर्भवेत्तस्य पुरश्चर्याविधानतः । स्पर्धामुद्धूय भवने लक्ष्मी
र्वाणी वसेत्ततः । पुष्पाञ्जल्यष्टकं दत्वा मूलेनैव पठेत्सकृत् । दशवर्षसहस्राणां पूजा
याः फलमाप्नुयात् । भूर्जे विलिख्य गुटिकां स्वर्णस्थां धारयेद्यदि । कण्ठे वा दक्षिणे बाहौ सो
ऽपि विष्णुर्न संशयः । अश्वमेधसहस्राणि वाजपेयशतानि च । महादानानि यान्येव सह
ड्स्रावणायतः । कवचस्य प्रसादेन जीवन्मुक्तो भवेन्नरः । त्रैलोक्यं क्षोभयत्येव त्रैलोक्यवि
जयी भवेत् । प्रादक्षिण्यं भुवश्चैव कलां नार्हन्ति षोडशीम् । इदं कवचमज्ञात्वा भजेद्यः पु
रुषाधमः । शतलक्षप्रजप्तोऽपि न मन्त्रः सिद्धिदायकः । इति सनत्कुमारतन्त्रे त्रैलोक्यमंग

लेनामकवचम् अथ शिवस्तोत्रम् परायोग्निमरुद्व्योमसलिलेशेंद्वर्कमूर्तये सर्वभूता
न्तरस्थायशंकरायनमोनमः अकारतत्वातीतायअकृतयेअकृतजन्मने अतीन्द्रियायस्मर
मेधाविज्ञायनमोनमः स्थूलसूक्ष्मविभागाभ्यामनिर्देश्यायसंभवे भवायभवभूताय
दुःखहन्त्रेनमोस्तुते तर्कमार्गातिभूतायतपसांफलदायिने चतुर्वर्गवदान्यायसर्वज्ञा
यनमोनमः आदिमध्यान्तशून्यायनिरस्ताशेषभीतये योगिध्येयायमहते निर्गुणायन
मोनमः विश्वात्मनेविचित्रायविलसच्चन्द्रमौलये कंदर्पदर्पनाशायकालहन्त्रेनमोनमः
विषाशनायविहरद्भुजगेन्द्रकपर्दिने सरिद्धाममलाबद्धकपर्दायनमोनमः ॥
शुद्धायशुद्धभावायशुद्धानामंतरात्मने पुरान्तकायपूर्णायपुण्यनाम्नेनमो
नमः तुष्टायनिजभक्तानांभुक्तिमुक्तिप्रदायिने निर्वाससेनिराधारा ॥
यविश्वधाम्नेनमोनमः त्रिमूर्तिमूलभूतायत्रिनेत्रायहिसंभवे ॥
त्रिधाम्नांधामरूपायजन्मज्ञायनमोनमः देवासुरशिरोरत्नकिरणारुणि ॥
मेंश्रीगणेशायनमः ॐनमोभगवतेवासुदेवाय ॐनमोनारायणायनमः ॐ

तोऽस्त्विये कौलाय निजकौलाय दत्तार्थाय नमो नमः स्तोत्रेणानेन पूजायां श्रीगणेशेन्द्रगताः प
तिम भुक्तिमुक्तिप्रदे भक्त्या सर्वत्र परमेश्वरम् इति शिवस्तोत्रं अथ शिवकवचम् भगा
वद्देवदेवेश सर्वाम्नायप्रपूजित सर्वमेकं स्थितं देव कवचेन प्रकाशयेत् प्रसादाख्यस्य
मंत्रस्य कवचं मे प्रकाशय सर्वरक्षाकरं देव यदि स्नेहोऽस्ति मां प्रति श्रीभगवानुवाच प्र
सादमंत्रकवचस्य वामदेव ऋषिः पंक्तिश्छंदः सदाशिवो देवता साधकाभीष्टसिद्धौ वि
नियोगः शिरो मे सर्वदा पातु प्रासादाख्यः सदाशिवः षडक्षरस्वरूपो मे वदनं तु महेश्वरः
पंचाक्षरात्मा भगवान्भुजौ मे परिरक्षतु मृत्युंजयस्त्रिबीजात्मा आयू रक्षतु मे सदा वट
मूलसमासीनो दक्षिणामूर्तिरव्ययः सदा मां सर्वदा पातु षट्त्रिंशार्णस्वरूपधृक् द्वाविंशा
र्णात्मको मंत्रः ऊरू मे परिरक्षतु त्रिवर्णात्मा नीलकंठः कंठं रक्षतु सर्वदा चिंतामणि
बीजरूपो ह्यर्धनारीश्वरो हरः सदा रक्षतु मे गुह्यं सर्वसंपत्प्रदायकः एकाक्षरस्वरूपा
त्माकूटरूपी महेश्वरः मार्तंडभैरवो नित्यं पादौ मे परिरक्षतु तुम्बुराख्यो महाबीजस्व
रूपः त्रिपुरांतकः सदा मां रणभूमौ च रक्षतु त्रिदशाधिपः ऊर्ध्वमूर्धानमीशानो मम

श्री॰ त॰सा॰ २७२

272

रक्षतु सर्वदा दक्षिणांशं तत्पुरुषो मामाव्यात् क्षितिनायकः अघोराख्यो महादेवः पूर्वां-
शं परिरक्षतु उत्तरांशे सदापातु सद्योजातस्वरूपधृक् पश्चिमांशे सदापातु वामदेवो
महेश्वरः इत्येवं तारकं देवि कवचं देवदुर्लभम् प्रातःकाले पठेद्यस्तु सोऽभीष्टफल-
माप्नुयात् पूजाकाले पठेद्यस्तु कवचं साधकोत्तमः कीर्तिश्रीकान्तिमेधायैः सहि-
तो भवति ध्रुवं कण्ठे यो धारयेदेतत्कवचं मन्त्ररूपकं युद्धे च जयमाप्नोति द्यूते वादे
च साधकः कवचं धारयेद्यस्तु साधको दक्षिणे भुजे देवा मानवगन्धर्वा वश्यास्तस्य
न संशयः कवचं शिरसा यस्तु धारयेद्यतमानसः करस्थास्तस्य देवेशि अणिमाद्य-
ष्टसिद्धयः

रा॰
त्र-रु॰

राथीयश्चमानवः पठेद्वा त्रयं यः सहस्रावारमेकं तथा निशि यन्नेतु त्रोस्तथा धात्राम्राश्चया-
त्रात्र संशयः भीतो भयात्प्रमुच्येत देवि सत्येन संशयः यांयान्समीहते कामांस्तांस्ता-
मोति निश्चितं अप्रकाश्यमिदं गुह्यं न देयं यस्य कस्यचित् सत्कुलीनाय शान्ताय ऋजवे
दंभवर्जिते दद्यात्स्तोत्रमिमं पुण्यं सर्वकामफलप्रदम् ध्यानं वक्ष्यामि देवस्य यथा ध्या-
त्वा पठेन्नरः शुद्धस्फटिकसंकाशं सहस्रादित्यवर्चसम् अष्टबाहुं त्रिनयनं चतुर्बाहुं द्वि-
बाहुकम् भुजंगमेखलं देवमग्निवर्णं शिरोरुहम् भुजंगमेखलं देवमग्निवर्णं शिरो-
रुहम् दिगंबरं कुमारेशं वटुकाख्यं महाबलम् खट्वांगमसिपाशं च शूलं चैव तथा
पुनः डमरुं च कपालं च वरदं भुजगं तथा नीलजीमूतसंकाशं नीलांजनचयप्रभम्
दंष्ट्राकरालवदनं नूपुरांगदसंकुलम् आत्मवर्णसमोपेतं सारमेयसमन्वितम् ध्यात्वा
जपेत्सुसंहृष्टः सर्वान्कामानवाप्नुयात् एतच्छ्रुत्वा ततो देवी नामाष्टशतमुत्तमम् भै-
रवाय प्रहृष्टाभूत्स्वयं चैव महेश्वरी इति विश्वसारतंत्रे आपदुद्धारकल्पे वटुकभैरवना-
मः समाप्तः अथ भैरवीस्तोत्रम् स्तमानया त्वां त्रिपुरे लोकाभीष्टफलाप्तये यथात्र

२७८
५५॥

श्री॰
त सा॰
२७५

275

जेतितोतितोलसौमनजास्मरदूजितास् ब्रलादयस्तृतिपातेरपिसूक्ष्मरूपंजाने
तिपातेरपिसूक्ष्मरूपोजाने तिनैवजगदादिमूर्तिम् तस्माद्वयेकचननानवकंकमा
भ्योसूलोस्तमःसकलवामयमालम्तास् १ मघःसमयतमहृह दिवाकराभोवि
यास्तहस्रवरदाभयविक्रहस्ताम् नेत्रोत्पलेस्त्रिभिरलंकृतवक्त्रपद्मांबांतावहारक
चिरांत्रिपुरेभजेति २ सिंदूरपूरकविरंकुचभावनम्रजन्मांतरेषुकृतपापफलैकगा
म्यम् अन्योन्यभेदकलहाकलमानसास्ते जानेतिकिंजडधियस्तवरूपमेव ३ स्थू
लांवदंतिश्रुतयःश्रुतयोगणांतिसूक्ष्मांवदंतिवचसामधिवासमन्ये त्वांमूलमाहुर
परेजगतांभवानिमन्यामहेवयमपारकृपांबुराशिम् ४ चंद्रावतंसकलितांपारं
दुस्रुप्रांपंचाशदक्षरमयीहृदिभावयामि त्वांपुस्तकजपवटीमृतनांसुकंभव्याख्याव
हस्तकमलेदधतीत्रिनेत्रां ५ शंभुस्त्वमद्रितनयाकलितार्धभागोविष्णुस्त्वमेवकमलापरिव
हृतदेहः पद्मोद्भवस्त्वमसिवागधिवासभूमिरखेषांक्रियाश्चजगतित्रिपुरेत्वमेव ६ याश्रित्यवाम
वभवोस्वतंत्रःपरादीनभावात्मदेषुविहितात्मसदैमयंति केठास्तिभिखकवलोःपदेवतानामेविन्मयीपूरिकरा

चिनेकिस्मतमि १

आकंप्यवाग्रुमवजित्यचैवैरिषट्टुमालोकालिश्चलधियानिजनामिकाग्रम् ध्यायंति
मूर्ध्निकलितेंदुकलावतंसेवह्रूपमेवकृतिनस्तवकर्णकुंभिचरम् तोप्राप्यमन्मथारि
पोर्वपुरर्धभागं स्तंहिंकरोमिजगतामितिवेदवादः सत्यंतदद्यितनयेजगदेकमात
र्नोचेदशेषजगतां स्थितिरेवनस्यात् ९ पूर्णोविधायकलशैमेस्तवपादपानां पीठेन
वोवकनकाचलगह्वरेषु गायंतिसिद्धवनिताः सहकिंनरीभिरास्वादितामृत
रसारुणनेत्रपद्माः १० विकसद्विलासवसुधामृतयमहहंतोयांतोस्तवाससभवता
ह्लिकवराजधानीम् सोप्तमृगवत्सकमलासयंतोदेवीभजेहृदिपदाम्बुतसिलका
त्रीम ११ आनंदजन्मभुवनंकृतोनोवैतन्यमात्रतनमेबलवाश्रयामि ब्रह्मेशवि
ष्णुभिरुपासितपादमम्भसौभाग्यजन्मवसतोत्रिपुरेयथावत् १२ सर्वार्थभाविभव
नेसृजतीउदूपायातहिमतिपुनरर्कतनयस्वशामसा वत्सातिमिकाहवतिनत्सकाले
पुरांतेताधारतामनसिजातनविस्मरामि १३ नारायणीतिनरकार्णवतारिणीति
गौरीतिखेदशमनीतिसरस्वतीति ज्ञानप्रदेतिनयनत्रयभूषितेतितामद्रिराजतन

श्री॰
ल॰ सा॰
२७६

276

ये वक्ष्यथा भजंति ॥ ४५ ॥ ये स्तुवंति जगन्मातः स्तोत्रैर्द्वादशभिः क्रमात् त्वामेव प्राप्य ता-
किल हिं प्राप्स्यन्ते परां गतिं इति श्रीभैरवीस्तवराजः समाप्तः अथ भैरवीकवचं श्रीदेव्यु-
वाच भैरव्याः सकला विद्याः श्रुताश्चिगतनामया साम्प्रतं श्रोतुमिच्छामि कवचं यत्पुरोदि-
तं त्रैलोक्यविजयं नाम शस्त्रास्त्रविनिवारणम् त्वत्तः परतरो नाथ कः कृपां कर्तुम-
र्हति श्रीईश्वर उवाच शृणु पार्वति वक्ष्यामि सुंदरि प्राणवल्लभे त्रैलोक्यविजयं नाम
कवचं मंत्रविग्रहं पठित्वा धारयित्वेदं त्रैलोक्यविजयी भवेत् जघान सकलान्दैत्यान्य-
द्धृत्वा मधुसूदनः ब्रह्मा सृष्टिं वितनुते यद्धृत्वाभीष्टदायकः धनाधिपः कुबेरोपि वास-
वस्त्रिदशेश्वरः यस्य प्रसादादीशोहं त्रैलोक्यविजयी विभुः न देयं परशिष्येभ्यो साध-
केभ्यः कदाचन पुत्रेभ्यः किमन्येभ्यो दत्वा मृत्युमवाप्नुयात् भैरव्याः कवचस्यापि द-
क्षिणामूर्तिरेव च विराट् छंदो जगद्धात्री देवता बालभैरवी धर्मार्थकाममोक्षेषु वि-
नियोगः प्रकीर्तितः अधरो बिंदुमानाद्यः कामः शक्तिः शशीयुतः भृगुर्मनुः स्वरयुतः सर्गो बीजत्रया-
त्मिका बालैषा मे शिरः पातु बिंदुनादयुतापि सा भाले पातु कुमारी मां सर्गहीना कुमारिका दृशौ मे पातु वाग्बीजं कर्णयुग्मं सदावतु

ह्सैं पातु सदा पार्श्वे युग्मे ह्सकलरीं सदा मतिं पातु ह्सौः मध्ये भैरवी भुवि डलेभा ऐं ह्रीं
श्रीं मे मध्यदेशं बीजविद्या सदावतु ह्सैं ह्स्हैं सदा पातु नाभिं ह्सकलह्रीं सदा पातु ह्स्रौः
कुटी पातु षट्कूटा भैरवी मम ह्सैं ह्सरैं सकिली पातु ह्सकलरीं सदावतु गुह्यदेशे
ह्स्रीं पातु जननी भैरवी मम सम्पत्प्रदा सदा पातु ह्सैं जंघे ह्सकली पदम् पातु ह्स्रौः स
र्वदेहं भैरवी सर्वदावतु ह्सैं मामवतु प्राच्यां ह्सकली पावकेवतु ह्स्रौः मे दक्षिणे पा
तु भैरवी चक्रसंस्थिता ह्रीं क्लीं ब्लें मां सदा पातु नैरृत्यां चक्रभैरवी ह्रीं कल ह्रीं ह्सरौः
पश्चिमे पातु भैरवी ह्रीं ह्रीं ह्रीं पातु वायव्यां ऐं ह्रूं पातु सदा मे वै ह्रीं ह्रीं पातु सदेशान्ये दक्षि
णे कालिकेवतु ऊर्ध्वं प्रागुक्तबीजानि रक्षेतु मामधः स्थले दिग्विदिक्षु स्वाहा पातु का
लिका खड्गधारिणी ॐ ह्रीं ह्रीं हूं फट् स्वाहा तारा सर्वत्र मां सदावतु संग्रामे कानने दुर्गे तो
ये तरंग दुस्तरे खड्गकर्त्रिधरा सा या सदा मां परिरक्षतु इति ते कथितं देवि सारात्सार
तरं महत् त्रैलोक्यविजयं नाम कवचं परमाद्भुतं यः पठेत् प्रयतो भूत्वा पूजायाः फलमा
प्नुयात् स्पर्धामुद्धूय भवने लक्ष्मीवाणीवसेत्ततः यः शत्रुभीतो रणकातरो वा भीतो वने वा

श्री· त· सा· २७७

277

सलिलालयेवा वादेसभायांप्रतिवादिनोवाभ्रान्तःप्रकोपान्नृपसंकुलाद्वा प्रचंडदंड
क्षमनाश्चभीतोगुरोःप्रकोपादपिकृच्छ्रसाध्यात् अभ्यर्च्यदेवींप्रपठेत्त्रिसंध्यंसस्यात्महे
शप्रतिमोनयीच त्रैलोक्यविजयंनामकवचंमन्मथोदितं विलिख्यभूर्जेगुटिकांस्वर्ण
स्थांधारयेद्यदि कंठेवादक्षिणेबाहौत्रैलोक्यविजयीभवेत् तद्गात्रंप्राप्यशस्त्राणिभवंति
कुसुमानिच लक्ष्मीःसरस्वतीतस्यनिवसेद्वदनेसदा एतत्कवचमज्ञात्वायोभजेद्भैरवी
पराम् बालांवाप्रजपेद्विद्यांदरिद्रोमृत्युमाप्नुयात् इतिश्रीरुद्रयामलेतन्त्रेत्रैलोक्यवि
जयेनामभैरवीकवचं संपूर्ण श्रीविद्यास्तोत्रम् कल्याणवृष्टिभिरिवामृतपूरिताभिर्लक्ष्मी
स्वयंवरणमंगलदीपिकाभिः सेवाभिरंबतवपादसरोजमूलेनाकारिकिंमनसिभा
ग्यवतांजनानां १ एतावदेवजननिस्पृहणीयमेतत्त्वद्वन्दनेषुसलिलस्थसरोजनेत्रे सा
न्निध्यमुद्यदरुणायुतसोदरस्यत्वद्विग्रहस्यसुधयापरयाप्लुतस्य २ ईषत्त्वभावकलुषा
कतिनामसंतिब्रह्मादयःप्रतिदिनेप्रलयाभिभूताः एकस्सएवजननिस्थिरसिद्धिरेषः
पादयोस्तवसकृत्प्रणतिंकरोति ३ लब्ध्वासकृत्त्रिपुरसुन्दरितावकीनंकारुण्यकंदलितकांतिभरं

कटाक्षमकंदर्पभावसुभगास्त्वयि भक्तिभाजः सम्मोहयन्ति तरुणीर्भुवनत्रयेपि ४ ह्रीं
कारमेव तव नाम गृणन्ति वेदाः मातस्त्रिकोणनिलये त्रिपुरे त्रिनेत्रे त्वत्संस्मृतौ यम
भटाभिभवं विहाय दीव्यन्ति नन्दनवने सह लोकपालैः ५ हन्तुः पुरामधिगलं परिपी
यमानः क्रूरः कथं न भविता गरलस्य वेगः आश्वासनाय यदि मातरिदं तवार्धं देहस्य
शश्वदमृताप्लुतशीतलस्य ६ सर्वज्ञतां सदसि वाक्पटुतां प्रसूते देवि त्वदंघ्रिसरसीरु
हयोः प्रणामः किंचित्स्फुरन्मकुटमुज्ज्वलमातपत्रं द्वे चामरे च महतीं वसुधां ददाति
कल्पद्रुमैरभिमतप्रतिपादनेषु कारुण्यवारिधिभिरम्ब भवत्कटाक्षैः आलोकय त्रि
पुरसुन्दरि मामनाथं त्वय्येव भक्तिभरितं त्वयि बद्धतृष्णम् ८ हन्तेतरेष्वपि निधाय मनां
सि चान्ये भक्तिं वहन्ति किल पामरदैवतेषु त्वामेव देवि मनसा समनुस्मरामि त्वामेव
नौमि शरणं जननि त्वमेव ९ लक्ष्येषु सत्स्वपि तवाक्षिविलोकनानामालोकय त्रिपुर
सुन्दरि मां कथंचित् नूनं मया च सदृशः करुणैकपात्रं जातो जनिष्यति जनो न च जायते
वा १० ह्रीं ह्रीमिति प्रतिदिनं जपतां तवाख्यां किं नाम दुर्लभमिह त्रिपुराधिवासे माला

श्री॰
तं॰ सा
२२५

किरीटमदवारणमाननीयां त्वां सेवते मधुमती स्वयमेव लक्ष्मीः सम्यक्करणिमकले
न्द्रियनंदनानि साम्राज्यदानक्षमाणि सरोरुहाक्षि त्वद्वंदनानि दुरितानाम्यतानि मा
मेव मातरनिशं कलयंतु लयम् १२ कल्पोपसंहरणकल्पितताण्डवस्य देवस्य खंडपर
शोः परभैरवस्य पाशांकुशैः क्षुरशरासनपुष्पबाणा सा साक्षिणी विजयते तव मूर्तिरेका
१३ लग्नं सदा भवतु मातरिदं तवार्द्रं तेजः परं कुलकुलंकमपंकशोणम् भास्वत्किरीट
ममृतांशुकलावतंसं मध्ये त्रिकोणमुदितं परमामृतार्द्रम् १४ ह्रींकारत्रयसंपुटेन म
हता मंत्रेण संदीपितं स्तोत्रं यः प्रतिवासरं तव पुरो मातर्जपेन्मंत्रवित् तस्य क्षोणिभु
जो भवंति वशगा लक्ष्मीश्चिरस्थायिनी वाणी निर्मलसूक्तिभावभरिता जागर्ति दीर्घं व
यः इति श्री[illegible]विरचितं कल्याणस्तोत्रं अथ किंकिणीस्तोत्रं अथ स्तवं प्रवक्ष्यामि त्रिपु
रार्णवसम्मितम् किं किं दुःखं दनुजदलिनि क्षीयते न स्मृतायां कां कां कीर्तिं कुल
कमलिनि प्राप्यते नार्चितायाम् किं किं सौख्यं सुरवरनुते प्राप्यते न स्तुतायां के के यो
गा यतिन वितते विश्वमाले विलीनायाम् १ सर्गे सर्गे भरस्फारितानाशेषविभ्रमे ।

विंबेंद्रमंडलांतस्थे नमस्ते हरवल्लभे । जगदाह्लादनोद्योतभोगविन्यासयोगिनी ।
स्थितिभावस्थिते देवि नमः स्थाणुप्रिये विके । भावाभावपृथग्भावस्वभावोदयकर्म
णि चेतस्तल्पपंचके देवि नमस्ते भंहरांगते । स्मृताभवभयध्वंसि पूजिताखिलशुभंकरी
स्तुता वांछितदे देवि सदा सिद्धिकरणाकरे । परमानंदबोधाधिरूपे तेजःस्वरूपिणि देव
हृद्देशे रतनिस्पृहचरणांबुजे विद्धि ज्ञानि महामते मातर्मातर्नमोस्तु ते स्रष्टिस्थि
तिप्रसंहारहेतुभूते सनातनि गुणत्रयात्मिके सिते जगतः कारणेच्छया अनुग्रहाय
भक्तानां गृहीतदिव्यविग्रहे भक्तस्य मे नित्यपूजायुक्तस्य परमेश्वरि ऐहिकामुष्मिकीं
सिद्धिं देहि विद्यावरदे ते तापत्रयपरिज्ञानभाजनं त्राहि मां शिवे नान्यं वदामि न शृणो
मि न चिंतयामि नान्यं स्मरामि न भजामि न चाश्रयामि भक्त्या त्वदीयचरणांबुजमसाद
रेण मां त्राहि देवि कृपया मयि देहि सिद्धिम् यज्ज्ञानाद्वा प्रमादाद्वा मोहाद्वावैकल्यतोपकृत
व यन्न्यूनमतिरिक्तं वा तत्सर्वं क्षंतुमर्हसि । द्रव्यहीनं क्रियाहीनं श्रद्धामंत्रविवर्जितं ।
तत्सर्वं कृपया देवि क्षमस्व त्वं दयानिधे यन्मया क्रियते कर्म तन्महत्त्वल्पमेव वा त

स्सर्वं व जगद्धात्री तेन त्वमसि मे जलिः इति किंकिणीतन्त्रे श्रीत्रिपुरसुन्दरीकवचं श्रीदे
व्युवाच देवदेव महादेव भक्तानां प्रीतिवर्धन सूचितं यन्महादेव्याः कवचं कथयस्व
मे श्रीभैरव उवाच शृणु देवि प्रवक्ष्यामि कवचं देवदुर्लभं अप्रकाश्यं परं गुह्यं साध
काभीष्टदायकं कवचस्यास्य ऋषिर्देवि दक्षिणामूर्तिरव्ययः छन्दः पंक्तिः समुद्दिष्टं दे
वी त्रिपुरसुन्दरी धर्मार्थकाममोक्षाणां विनियोगस्तु साधने वाग्भवः कामराजश्च श
क्तिबीजं महेश्वरि ऐं वाग्भवः पातु पार्श्वे मां क्लीं कामराजस्तथा हृदि सौः शक्तिबी
जं सदा पातु नाभौ गुह्ये च पादयोः ऐं क्लीं सौः वदने पातु बाला मां सर्वसिद्धये हसैं हसक
लरीं हसौः पातु भैरवी कण्ठदेशतः सुन्दरी नाभिदेशे व्याच्छीर्षे कामकला सदा भ्रूनासयोरन्त
राले महात्रिपुरसुन्दरी ललाटे सुभगा पातु भगा मां भगदेशतः भगोदया तु हृदये उदरे भग
सर्पिणी भगमाला नाभिदेशे लिंगे पातु मनोभवा गुह्ये पातु महादेवी राजराजेश्वरी शिवा
चैतन्यरूपिणी पातु पादयोर्जगदम्बिका नारायणी सर्वगात्रे सर्वकार्ये शुभंकरी ब्रह्माणी
पातु मां पूर्वे दक्षिणे वैष्णवी तथा पश्चिमे पातु वाराही उत्तरे तु महेश्वरी आग्नेय्यां पातु कौ

279

मारीमहालक्ष्मीश्चनैर्ऋते वायव्यांपातुचामुंडा इंद्राणीपातुईशके जलेपातुमहामाया
पृथिव्यांसर्वमंगला आकाशेपातुवरदासर्वत्रभुवनेश्वरी इदंतुकवचंदेव्यादेवाना-
मपिदुर्लभम् यःपठेत्प्रातरुत्थायशुचिःप्रयतमानसः नाधयोव्याधयस्तस्यनभयंच
क्वचिद्भवेत् नचमारीभयंतस्यपातकानांभयंतथा नदारिद्र्यंवशंगच्छेत्तिष्ठेत्सत्त्वव
शेनच गच्छेच्छिवपुरंदेविसत्यंसत्यंवदाम्यहम् इदंकवचमज्ञात्वाश्रीविद्यांयोजपेत्प्रि
ये सनाप्नोतिफलंतस्यप्राप्नुयाच्छस्त्रघातनम् इतिश्रीसिद्धयामलेत्रिपुरसुंदरीकवचं
अथमहात्रिपुरसुंदरीकवचं श्रीदेव्युवाच भगवन्देवदेवेशलोकानुग्रहकारक त्व-
त्प्रसादान्महादेवश्रुतामेशास्त्रनेकधा साधनेविविधंदेवकीलकोद्धरणंतथा शा
पादिरहितंस्तोत्रंश्रुतासर्वमयाप्रभो राजराजेश्वरीदेव्याःकवचंसूचितंमयि श्रो
तुमिच्छामितत्सर्वंकथयस्वमयिप्रभो ललनावाक्यमाकर्ण्यवाणीवादितामिपुनःपुनः श्री
स्वभावात्मव्यादेविश्रोतुमिच्छसितत्प्रिये अन्यंतगुप्तंकवचंसर्वकामफलप्रदम् श्रीत
येनवदेवेशिकथयामिशृणुष्वतत् अस्यराजराजेश्वरीश्रीमन्महादेवात्रिपुरसुंदरीको

श्री॰
ते सा॰
२८॰

उधीविद्याकवचस्य श्रीमहादेवऋषिः अनुष्टुप्छंदः राजराजेश्वरी श्रीमहात्रिपुरसुं
दरीदेवता सर्वार्थसाधने विनियोगः पूर्वे मां भैरवी पातु बाला मां पातु दक्षिणे मालिनी
पश्चिमे पातु वासिनी उत्तरे वतु ऊर्ध्वं पातु महादेवी महात्रिपुरसुंदरी अधस्तात्पातु देवे
शी पातालतलवासिनी आधारे वाग्भवः पातु कामराजस्तथा हृदि उन्मनः पातु मां
नित्यं मस्तके सर्वकामदः ब्रह्मरंध्रे सर्वगात्रे छिद्रस्थाने सर्वदा महाविद्या भगवती पा
तु मां परमेश्वरी ऐं ह्रीं ललाटे मां पायात् क्लीं सौः ह्रूं सश्च नेत्रयोः नासायां कर्णयोः श्रीं वं ह्रीं
ह्रूं ह्रां ह्रीं चिबुके तथा सौः पातु गले हृदये मः ह्रीं मे नाभिदेशके कल ह्रीं ह्रीं क्लीं गुह्य
देशे सह्रीं पातु मे पादयोः सह्रीं मां पातु सर्वतः सह्रीं पातु वने स्थितम् जले स्थले तथा का
शे दिक्षु राजगृहे तथा ह्रीं ह्रैं मां वह्नितं पातु सह्रीं सह्रीं मनोभवा हंसः पायात् महादेवी प
रं निष्कलदेवता विजया मंगला दूती कल्याणी भगमालिनी ज्वाला च मालिनी नित्या सर्व
दा पातु मां शिवा इत्येवं कवचं देवि देवानामपि दुर्लभम् तव प्रीत्या मया ख्यातं गोपनीयं प्रयत्न
तः इदं रहस्यं परमं गुह्याद्गुह्यतरं प्रिये धन्यं यशस्यमायुष्यं भोगमोक्षप्रदं शुभं इमसत्रुनाशने रोगनाशने वशी
करे

२८०

ग्राकर्षणकरं देवि सर्वभोग्याटकरं शिवे इदं कवचमज्ञात्वा राजराजेश्वरीं शिवाम् यो जपे
योगिनीवृंदे स मे लोनात्र संशयः न तस्य मंत्रसिद्धिः स्यात्कदाचिदपि शांकरि इह लोके
वदारिद्र्यं रोगदुःखभयानि च परत्र नरके गत्वा पशुयोनिमवाप्नुयात् तस्मादेतत्सदा
भ्यसेदयिकारी भवेत्ततः मद्वक्त्रनिर्गतमिदं कवचं मनुष्यैः पूजाविधेश्च पुरतो ऽधिकता
पठेयः सौभाग्यभोगललितानि शुभानि भुक्त्वा देव्याः पदं व्रजति तत्सुनरे तकाले इति
ज्ञलानंदसंहितायां श्रीमहात्रिपुरसुंदरीषोडशी कवचं अथ प्रचंडचंडिकालोवे
नभोमुद्धसरोजमध्यविलसद्बंधूकपुष्पारुणं भास्वद्भास्करमंडले तदुदरे योनि
चक्रे महत् तन्मध्ये विपरीतमैथुनरतप्रद्युम्नतत्कामिनो पृष्ठस्थांतरुणार्ककोटिवि
लसत्तेजस्वरूपां शिवाम् वामे छिन्नशिरोधरां तदितरे पाणौ महत्कर्तृकां प्रत्याली
ढपदां दिगंतवसनामन्मत्तकेशावृजाम् छिन्नात्मीयशिरः समुच्छलदसृग्धारां
पिबंतीं परां बालादित्यसमप्रकाशविलसन्नेत्रत्रयोद्भासिनीम् २ वामादन्यत्र नाले
बहुबहलगलद्रक्तधाराभिरुच्चैः पायंतीमस्थिभूषां करकमललसत्कर्तृकाम्

श्री·
त·सा·
२८१

281

ग्ररूपां रक्तामाल्यकेशीमधगलनयनांवर्णिनीमात्मशालिंभ्रमालीकोपपादामकलितन
यनांयोगिनींयोगगतिद्धे ३ हिमवसनांमुक्तकेशींप्रलयघनघटाघोररूपांप्रचंडांदंष्ट्राढ्यंश्रोत
वक्त्रोदरविवरमलोलजिह्वाग्रभासां विस्फलोलातिशुभ्रांमोहृदयतटलसद्गोभिभीमा
स्वमूर्तिंमयाःध्यायिनात्मकंवशगलितकृपीठसंकीर्णांवर्धयंतीं ४ अत्लेपानाद्युताये:
शिरसिविनिहितामंद्यपादारविंदोवात्मत्तेयोगिमुख्यै: प्रतिपदमतिशांविस्मृताविश्व
रूपां संसारेसारभूतांत्रिभुवनजननींकिन्नमस्तांप्रपान्नामिष्टांतामिष्टदात्रींकलिक
लुषहरांचेतसाभावितयामि ५ उत्पत्तिस्थितिसंहृतीर्घटयितुंयत्नेविरूपांतनंनैगुण्या
न्नगतांयदीयविकृतिर्ब्रह्माच्युत:शूलभृत् तामाद्यांप्रकृतिंस्मरामिमनसासर्वार्थसं
सिद्धये श्रस्या:श्रेयपदारविंदयुगलेलाभंभजंतेमरा: ६ अत्लिप्रिपितपदेप्रीभोगरू
मायचोहंब्रह्मविष्णुकलत्रंत्रिभाषितेपुरा सर्वसिद्धिप्रदेमातत्सूहापातकनाशने य:यं
मार्गावंमभसंभावितोहं पशुजनविमुखोहंभैरवीमाश्रितोहंगुरुचरणरतोहंभैरवोहं
शिवोहं ७ इदंस्तोत्रंमयाप्रोक्तंप्रातरुत्थायदेव्या:सन्निहिताभवा ।:

तस्य सिद्धिर्भवेद्देवि वीछिन्नार्थप्रदायिनी यन्नेयार्थं स्मृते नायायोहृयं हृत्सिनमेव च वह्ने
द्रो महाविद्यामह्यो सिद्धो लभेद्ध्रुवम् येषां सिद्धिर्भवेद्दुस्तिनैर्नितान्त्वजपनेरम्येप्रले
वोदरे विंवो निर्वचनीयपर्वसभगोमेडवलीमेडिते कडीकेदकविविविज्ञं वचितान्ता
नेदयानेपदे मातर्भक्तजनानकम्पिनि महामाये नमस्तुभ्यं नमः अथ कवचम् श्रीदेव्यु
वाच कथिता छिन्नमस्ताया या या विद्याः सुगोपिताः त्वयानाथेन जीवेश श्रुतास्ताश्चा
धिगता मया इदानीं श्रोतुमिच्छामि कवचं पूर्वसूचितम् त्रैलोक्यविजयं नाम कृप
याकथय प्रभो श्रीभैरव उवाच शृणु वक्ष्यामि देवेशि सर्वदेवनमस्कृते त्रैलोक्यवि
जयं नाम कवचं सर्वमोहनम् सर्वविद्यामयं साक्षात्सुरात्सुरजयप्रदम् धारणात्पठ
नादीशस्त्रैलोक्यविजयी विभुः ब्रह्मा नारायणो रुद्रो धारणात्पठनाद्यतः कर्त्ता पा
ता च संहर्त्ता भुवनानां सुरेश्वरि न देयं परशिष्येभ्यो भक्तेभ्योपि विशेषतः देयं शि
ष्याय भक्ताय प्राणेभ्योप्यधिकाय च देव्याश्च छिन्नमस्तायाः कवचस्य च भैरवः ऋ
षिर्विराट् छन्दः देवता छिन्नमस्तिका त्रैलोक्यविजये मन्त्रो विनियोगः प्रकीर्तितः

श्री.
नं. मा.
२८२

हूंकारो मे शिरः पातु छिन्नमस्ता नलप्रभा ह्रीं हूं ऐं त्र्यक्षरी भाले पातु रक्ता दिगंबरी श्री
ह्रीं हूं ऐं दृशौ पातु मुंडकर्त्रिधरापि सा सा विद्या प्रणवाद्यंता श्रुतियुग्मे सदावतु वज्रवै
रोचनीये हूं फट् स्वाहा च ध्रुवादिका घ्राणं पातु छिन्नमस्ता मुंडकर्त्रिधारिणी श्रीमा
या कूर्चवाग्बीजैर्वज्रवैरोचनीये हूं हूं फट् स्वाहा महाविद्या षोडशी ब्रह्मरूपिणी स्वा
पार्श्वे बालिका मां तु श्रवस्यारौ पायये तौ मुद्रा वदने सर्वतः पातु छिन्नमस्ता वशालि
का मुंडकर्त्रिधरा रक्ता साधकाभीष्टदायिनी वर्णिनी डाकिनीयुक्ता सापि मामभितो
वतु रमाद्या पातु जिह्वां च लज्जाद्या पातु कंठकं कूर्चाद्या हृदयं पातु भागाद्या स्तनयुग्मकं
रमया पुटिता विद्या पार्श्वौ पातु सुरेश्वरी मायया पुटिता पातु नाभिदेशं दिगंबरा वाग्बी
जपुटिता चैव मध्यं पातु सशालिका ह्रीं हूं वर्णिनी जानुं श्रीं ह्रीं हूं वज्रडाकिनी पदे सा
व विद्या स्थिता नित्या सर्वांगं मे सदावतु प्राच्यां पायादेकलिंगा योगिनी पावकोऽवतु
डाकिनी दक्षिणे पातु श्रीमहाभैरवी च माम् नैर्ऋत्यां सततं पातु भैरवी पश्चिमेऽवतु
इंद्राक्षी पातु वायव्येऽसितांगी पातु चोत्तरे संहारिणी सदा पातु शिवकोणे सकर्तृका

282

इत्थषु पालयः पातु दिग्विदिक्षु सकल्लेका क्रीं क्रीं क्रीं सा पातु पूर्वे हूं हूं मां पातु पावके
ह्रीं ह्रीं मां दक्षिणे पातु दक्षिणे पातु दक्षिणे कालिके वतु क्रीं क्रीं क्रीं चैव नैरृते सा हूं हूं
मां पश्चिमे वतु ह्रीं ह्रीं पातु मरुत्कोणे स्वाहा पातु सदोत्तरे महाकाली खड्गहस्तावल:
कोणे सदावतु तारो मायावधू कूर्चं फट्कारो यं महामनुः खड्गकर्त्रीधरा तारा चोर्ध्व
देशे सदावतु ह्रीं स्त्रीं हूं फट् स्यानालि पातु नीलसरस्वती इति ते कथितं देव्याः कव च
मंत्रविग्रहम् पठित्वा पठनाड्डीमः क्रोधाख्यो भैरवाऽग्रभ्ः सर्वासव मतो ह्याणा।
कर्ता हर्ता भवेत्स्वयम् यस्मात्तयाम धुमती याति सा साय कौतिकम् भूतिन्या याश्च
यक्षिण्याद्याकिन्याद्याश्च भैरवाः भ्रान्ता स्तम्भन्ति तालस्य कवचस्य प्रसादतः एतद्देवप
रं ब्रह्मकवचं मन्मुखोदितम् देवीमभ्यर्च्य गंधाद्यैः मूलेनैव पठेत्सकृत् संवत्सर
तता याल्लहूजा याः फलमाप्नुयात् भूर्जे विलिखितं चैतद्गुलिकां काञ्चनस्थितो धा
रयेद्दक्षिणे बाहौ कंठे वा यदि वा गणतः सर्वैश्वर्ययुतो भूत्वा त्रैलोक्य वशमानयेत् तस्य
गेहे वसेल्लक्ष्मीर्वाणी च वदनांबुजे ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रे यान्ति सौम्यताम् ३

श्री.
त.मा.
२५६
283

देवकवक्त्रमत्तानायोभजेच्छिन्नमस्तिकां सोपिप्राप्नोत्प्रसादेनसत्समाप्नोतिमानवः ३.
ति श्रीभैरवीतंत्रे त्रैलोक्यविजयंनामछिन्नमस्ताकवचं अथषण्णामस्तोत्रं कुंकुमध्य
मोनुःस्मरपररहितंसेंदुवामाक्षियुक्तंबीजंतेमातरेतत्त्रिपुरहरवधूत्रिःकृतंयेजपंति
तेषांगद्यानिपद्यानिचमुखकुहरादुल्लसंत्येववाचःस्वच्छंदंध्वांतधाराधररुचिरुचिरेस
र्वसिद्धिंगतानाम् १ ईशानःसेंदुवामःश्रवणपरिगतोबीजमन्यन्महेशिहंहंतेमंदचे
तायदिजपतिजनोवारमेकंकदाचित् जित्वावाचामधीशंधनदमपिचिरंमोहयन्नंबु
जाक्षीवृंदंचंद्रार्धचूडेप्रभवतिसमहाघोरबाणावतंसे २ ईशोवैश्वानरस्थःशशधर
विलसद्वामनेत्रेणयुक्तोबीजंतेद्वंद्वमन्यद्विगलितचिकुरेकालिकेयेजपंति द्वेषारंभंति
तेवैत्रिभुवनमभितोवश्यभावंनयंतिसृक्किद्वंद्वास्रधाराद्वयधरवदनेदक्षिणेकालिके
ति ३ ऊर्ध्वंवामेकृपाणंकरकमलतलेछिन्नमुंडंतथाधःसव्येऽभीतिंवरंचत्रिजगदघहरेदक्षिणेका
लिकेचजप्त्वैतन्नामयेवातवविमलतनुंभावयंत्येवदेवितेषामष्टौकरस्थाःप्रकटितवदनेसिद्ध
यस्त्र्यंबकस्य ४ वर्गाद्यंवह्निसंस्थाविधुरतिवलितंतत्त्रयंकूर्चयुग्मंलज्जायुग्मंचपश्चात्स्मितमुखिवत

२पःठद्वयंयोजयित्वा

मातर्ये ये स्मरन्ति स्मरहरमहिले भावयन्तः स्वरूपं ते लक्ष्मीलास्यलीलाकमलदलदृ
शः कामरूपा भवन्ति ५ प्रत्येकं वा द्वयं वा त्रयमपि च परं बीजमत्यन्तगुह्यं त्वन्नाम्नायो
जयित्वा सकलमपि सदा भावयन्तो जपन्ति तेषां नेत्रारविन्दे विहरति कमला वक्त्रशुभ्रां
शुबिम्बे वाग्देवी देवि मुग्धस्मरगतिसमलं सक्कं विपीनस्तनाढ्ये ६ गतासूनां वाङ्
प्रकरकृतकाञ्चीपरिलसन्नितम्बां दिग्वस्त्रां त्रिभुवनविधात्रीं त्रिनयनाम् श्मशानस्थे
तल्पे शववहृदि महाकालसुरत प्रसक्तां त्वां ध्यायन् जननि जडचेता अपि कविः ७
शिवाभिर्घोराभिः शवनिवहमुण्डास्थिनिकरैः परं सङ्कीर्णायां प्रकटितचितायां हर
वधूम् प्रविष्टां सन्तुष्टामुपरिसुरतेनातियुवतीं सदा त्वां ध्यायन्ति क्वचिदपि न तेषां
परिभवः ८ वदामस्ते किं वा जननि वयमुच्चैर्जडधियो न धाता नापीशो हरिरपि
न ते वेत्ति परमम् तथापि त्वद्भक्तिर्मुखरयति चास्माकमपि ते तदेतत्क्षन्तव्यं न ख
लु पशुरोषः समुचितः ९ समन्तादापीनस्तनजघनधृग्यौवनवतीरतासक्तो नक्तं
यदि जपति भक्तस्तव मनुम् विवासास्त्वां ध्यायन् गलितचिकुरास्तस्य वशगाः सम

श्री. स्त. मा. २८४

ल्लाः सिद्धौघाः अपि विचिरतरं जीवन्ति कवि: १० समाश्लिष्टो भूतो जयति विपरीतो यदि म
हाविर्बिम्बो ध्यायन्तिशयमहाकालसुरतो नदान्तस्येताणीतल विद्रवमाणविदु
षः कर्णे भोगे नैव शपाः स्वरहरवध्रुसिद्धिर्निवहाः ११ अमू ते संसारे जननि जगतीं पाल
यति वा समस्ते तिस्यादिप्रलयसमये संहरति वा अतस्त्वां धाता पिविभ्रभुवनपतिः श्रीप
तिरपि महेशोऽपि प्रायः सकलमपि किं त्वतो निभवती १२ अनेके से वै ते भवदयिकमौके
णतिवहास्त्विमूकाल्लेमातः किमपि न हि ज्ञातं निपरमे समाराध्यामायोद्दरिद्रवविरिंचा
दिभिरपि प्रपन्नो स्मि स्वैरं रतिरसमहानंदनिरतो १३ यदि श्रीकीलालेश्वविरपिसमीरे
पिगगणे त्वमेकाकल्याणी गिरिपरमणी कालिसकले स्तुतिः का ते मातस्तव वक्रा
णपामामगतिकं श्रमस्त्रातं भूयाभवमनुनभूयात्ममजडः १४ घमघानस्थः स्वस्थो गा
लितविकरो हिक्यटपरः सहसैवकौणो निजगलितवीर्येणजमहसं जपं स्तस्मैके
मनमपि तव ध्याननिरतो महाकालि स्वैरं समभवतिपूर्तिजोपरिहृदः १५ रटे संसाज्ञे मामध
गलितवीते हिचिक्रुरंसमूलं मध्याद्वे विनवतिविनायो जनदिने समस्त्रार्य प्रेमाणामनुमपि समुहकालिम

284

ततंगगनाद्रूष्टोयातितिनियपरिहृष्टः सकविवरः ९ सप्तछिद्रकोणंऽसमथनद्रयोमं
दिवमहोशुरोध्याय्ंनपनियदिभसकलवमनम् सगेथर्वश्रेणीपतिरिवकविताम्द
ततदीनःपर्येतेपरमपदलीनःप्रभवति १० शिवंवारपीठेशावशिवह्रदिसरवदनो
महाकालेनोस्त्रेन्मदनरसलावण्यनिरताम् समसमकोनलकेस्वयमपिरतानेस्ति
रताजनोयेध्यायेत्वामपिजननिमस्यात्स्मरहरः ११ सलोमास्थिस्वैरंपललमपि
माज्जीवमज्जीवमसितेपरेचोत्कृष्टमेषंनरमहिषयोःस्वागमपिवा बलितेपूजायाम्
पिवितरतोयंनरमलोनकिंसिद्धिसवीप्रतिपदमपूर्वाप्रभवति १२ वशीलक्षंमे
त्रेप्रजपतिहविष्याशानरतादिवामातर्युष्मच्चरणकमलध्यानतिपुणः परंनक्तं
नग्नोनिधुवनविनोदेनचमनुजपेल्लक्षंसम्यक्स्मरहरसमानःक्षितितले १३ इदंतो
त्रंमातस्तवमनुसमुद्धारणजडः स्वरूपाख्योपादाम्बुजयुगलपूजाविधियुतम् नि
शार्धेवापूजासमयमथवायस्तुपठतिप्रलापस्तस्यापिप्रसरतिकवित्वामृतरसः १४
प्रसंगातोहन्देतमन्वमरतिश्रमतरलेवशालस्पताणीपतिरपिकवेरश्रुतिनिधिः पि

श्री॰
त॰ सा॰
२८५

285

५+

पुः कारागारं कलयति वचनं केलिकल्पाविरं जीवन्मुक्तः स भवति च भक्तः स्तौति जनः २२
इति श्मशानकालीस्तोत्रं अथ श्मशानकालीकवचम् श्रीभैरव्युवाच कालीपूजा श्रुता नाथ भावाश्च
विविधाः प्रभो इदानीं श्रोतुमिच्छामि कवचं पूर्वसूचितं त्वमेव शरणं नाथ त्राहि मां
दुःखसंकटात् श्रीभैरव उवाच रहस्यं शृणु वक्ष्यामि भैरवि प्राणवल्लभे श्रीजगन्मङ्ग
लं नाम कवचं मन्त्रविग्रहं पठित्वा धारयित्वा च त्रैलोक्यं मोहयेत्क्षणात् नारायणोपि
यद्धृत्वा नारी भूत्वा महेश्वरम् योगिनं क्षोभमनयद्यद्धृत्वा च रघूद्वहः वरदृप्ताञ्जघाना
जौ रावणादिनिशाचरान् यस्य प्रसादादीशोपि त्रैलोक्यविजयी प्रभुः धनाधिपः
कुबेरोपि सुरेशोभूच्छचीपतिः एवं हि सकला देवाः सर्वसिद्धीश्वराः प्रिये श्रीजग
न्मङ्गलस्यास्य कवचस्य ऋषिः शिवः छन्दोनुष्टुब्देवता च कालिका दक्षिणेरिता ज
गतां मोहने दुष्टविजये भुक्तिमुक्तिषु योषिदाकर्षणे चैव विनियोगः प्रकीर्तितः शि
रो मे कालिका पातु क्रीङ्कारैकाक्षरी शिवा क्रीं क्रीं क्रीं मे ललाटं च कालिका खड्गधा
रिणी हूं हूं पातु नेत्रयुग्मं ह्रीं ह्रीं पातु श्रुती मम दक्षिणे कालिके पातु घ्राणयुग्मं महेश्वरी क्रीं
क्रीं क्रीं

रसनां पातु कैं कूं पातु कपोलकम् वदनं सकलं पातु ह्रीं ह्रीं पातु स्वरूपिणी द्वाविंश
त्यक्षरी स्कंधौ महाविद्या सुखप्रदा खड्गमुंडधरा काली सर्वांगमभितोवतु क्रीं हूं
ह्रीं त्र्यक्षरी पातु चामुंडा हृदयं मम ऐं हूं ओं ऐं स्तनद्वंद्वं ह्रीं फट् स्वाहा ककुत्स्थलम्
अष्टाक्षरी महाविद्या भुजौ पातु सकर्तृका क्रीं क्रीं हूं हूं ह्रीं ह्रीं करौ पातु षडक्षरी मम
क्रीं नाभिं मध्यदेशं च दक्षिणे कालिकेवतु क्रीं स्वाहा पातु पृष्ठं च कालिका सा दशा
क्षरी क्रीं ह्रीं दक्षिणे कालिके हूं ह्रीं पातु कटिद्वयम् काली दशाक्षरी विद्या स्वाहा मा
मूरुयुग्मकम् ॐ ह्रीं क्रीं मे स्वाहा पातु कालिका जानुनी सदा काली हृन्नामविद्येयं
चतुर्वर्गफलप्रदा क्रीं हूं ह्रीं ह्रीं पातु गुल्फं दक्षिणे कालिकेवतु क्रीं हूं ह्रीं च स्वाहा पा
तु चतुर्दशाक्षरी मम खड्गमुंडधरा काली वरदाभयहारिणी विद्याभिः सकलाभिः
सा सर्वांगमभितोवतु काली कपालिनी कुल्ला कुरुकुल्ला विरोधिनी विप्रचित्ता तथो
ग्रोग्रप्रभा दीप्ता घनत्विषः नीला घना बलाका च मात्रा मुद्रा मिता च माम् एतास्स
र्वाः खड्गधरा मुंडमालाविभूषणाः रक्षंतु स्वायुधैर्दिक्षु मां विदिक्षु यथा तथा इति ते

श्री·
त सा·
२९१

कथितं ते दिव्यं कवचं परमाद्भुतम् श्रीजगन्मंगलं नाम महाविद्यौघविग्रहं त्रैलोक्या
कर्षणं ब्रह्मन् कवचं मन्मुखोदितं गुरुं सम्पूज्य विधायाथ विधिवत्प्रपठेत्ततः कवचं त्रि
सकृद्वापि यावज्जीवं च वा पुनः एतच्छतार्धमावृत्य त्रैलोक्यविजयी भवेत् त्रैलोक्यं
लोभयत्येव कवचस्य प्रसादतः महाकविर्भवेन्मासात् सर्वसिद्धीश्वरो भवेत् पुष्पां
जलिं कालिकायै मूलेनैव पठेत्सकृत् शतवर्षसहस्राणां पूजायाः फलमाप्नुयात्
भूर्जे विलिखितं चैतत् स्वर्णस्थं धारयेद्यदि शिखायां दक्षिणे बाहौ कंठे वा धारयेद्यदि
त्रैलोक्यं मोहयेत्क्रोधात् त्रैलोक्यं चूर्णयेत्क्षणात् पुत्रवान् धनवान् श्रीमान् नानाविद्यानि-
धिर्भवेत् वह्न्यपस्मानि वचवत्साभवमेव न संशयः न देयं परशिष्येभ्यो ह्यभक्तेभ्यश्च वि
शेषतः शिष्येभ्यो भक्तियुक्तेभ्यश्चान्यथा मृत्युमाप्नुयात् स्पर्धामुद्धूय कमला वाग्देवी मंदिरे मुखे
पौत्रान्तं स्थैर्यमास्थाय निवसत्येव निश्चितं इदं कवचमज्ञात्वा यो जपेत्कालिदक्षिणां शतलक्षं प्रजप्तापि
तस्य विद्या न सिद्ध्यति सहस्रघातमाप्नोति सोऽचिरान्मृत्युमाप्नुयात् इति भैरवीतंत्रे श्रीजगन्मंगलं कवचं
सम्पूर्णम् अथ तारास्तोत्रं मातर्नीलसरस्वति प्रणमतां सौभाग्यसम्पत्प्रदे प्रत्यालीढपदस्थिते शवहृदि स्मेराननां॰
भोरुहे

२९

फुल्लेंदीवरलोचनत्रययुतेकर्णीकपालोत्पलेब्रह्मेवादयुनीनमेवशरणंतामीश्व
रीमाश्रये १ वाचामीश्वरिभक्तकल्पलतिकेसर्वार्थसिद्धीश्वरिगद्यप्राकृतपद्यजा
तरचनासार्वत्रसिद्धिप्रदेनीलेंदीवरलोचनत्रययुतेकारुण्यवारांनिधेसौभाग्यामृ
तवर्षणेनकृपयासिंचत्वमस्मादृशाम् २ त्ववैंगर्वसमूहपूरिततनोसपाद्विवेषो
ज्ज्वलत्रिवीतसंदरकटीष्याम्रतद्वेदोकिते मयःकृमगाल इन्नःपरिमिलन्मुडदयी
मूर्धन्यग्रेश्वेणिल्समुंडदामललितेभीमेभयंनाशयः ३ मायानेगविकाररूपलल
नाबिंदूर्ध्वंचंद्रात्मिकेहृल्लेखारमयीत्वमेवशरणंमेग्रात्मिकेमादृशः मूर्तिलेजनत्रि
याम्बचरितास्थूलातिसूक्ष्मापरावेदान्तेनहिगोचराकथमपिप्रासोनेतामाश्रये ४
त्वत्पादांबुजसेवयासुकृतिनोगच्छन्तिसायुज्यतांतस्याश्रीपरमेश्वरीविहरविहरब्रह्मादि
साम्यात्मनः संसारार्णवमज्जनेपततनुर्देवेंद्रमुख्यामराम्मातस्त्वत्पदसेवनेहिविमु
खाकिंमेदयी:सवते ५ मातस्त्वत्पदपंकजद्वयरजोमुद्रांककोटीरिणस्तेदेवाज्जय
संगरेविजयिनोनिःशंकमंकेगता: देवोहंभुवनेनमेसमइतिस्पर्धांवहंतः परेतत्व

श्री॰
त सा॰
२५७

287

त्यां नियतं यथाशुचि कवीनाथो व्रजेत निश्चये ९ तत्रामममरणाम लायनपराइहे समर्था
न्ते भूतप्रेतपिशाचराक्षसगणा यत्तत्र नागाधिपाः दैत्या दानवपुंगवाश्च खचरा व्याघ्रा
दिका ज्ञेन तवोड्डाकिन्याः कुपितो न कघमवजे मातः त्वणभूतले ७ लक्ष्मीः सिद्धिगणश्च
पादुकन्तुरवोः सिद्धाञ्जनश्चापि वाचिचित्तं भस्त्वापि रणेगनेगजच्छदास्त्ते भस्लेणामोहनं मा
तस्त्वत्पदसेवया वलन्दरणासिद्धिनितेते गुणाः कीर्तिकान्तमनोभवस्य भवति त्वद्दोपि
वाचस्पतिः ८ ताराष्टकमिदं पुण्यं भक्तिमान्यः पठेन्नरः प्रातर्मध्याह्नकाले च सायां
ह्ने नियतः शुचिः लभते कवितां दिव्यां सर्वशास्त्रार्थविद्भवेत् लक्ष्मीमनश्वरां प्राप्य भु
क्त्वा भोगान्यथेप्सितान् कीर्तिं कान्तिं च नैरुज्यं सर्वेषां प्रियतां भजेत विख्यातिं चापि लो
केस्मिन्नत्वा प्यन्ते मोक्षमाप्नुयात् इति श्रीनीलतन्त्रे ताराष्टकस्तोत्रं अथ ताराकवचं ईश्व
र उवाच कोटितीर्थेषु गोप्यानि विद्यातिभयमोचिनी दिव्या हि कवचेन तस्याः शृणुष्व
सर्वकामदं ताराकवचस्यास्य अक्षोभ्य ऋषिः त्रिष्टुप्छन्दः तारा भगवती देवता सर्वमन्त्रसिद्ध
ये विनियोगः प्रणवो मे शिरः पातु ब्रह्मरूपा महेश्वरी ह्रींकारः पातु ललाटे बीजरूपा महेश्वरी

ह्रींकारः पातु वदने लज्जारूपा महेश्वरी हूंकारः पातु हृदये भवानी शक्तिरूपधृक् फट्का
रः पातु वदने सर्वसिद्धिफलप्रदा खवीं मां पातु देवी श्रीगंडयुग्मे भयापहा निम्नोद
री सदा स्कंधयुग्मे पातु महेश्वरी व्याघ्रचर्मावृतकटी पातु देवी शिवप्रिया पीनोन्नतस्तनी
पातु पार्श्वयुग्मे महेश्वरी रक्तवर्तुलनेत्रा च कटिदेशे सदावतु ललज्जिह्वा सदा पातु ना
भौ मां भुवनेश्वरी करालास्या सदा पातु लिंगे चरी हरप्रिया पिंगोग्रैकजटा पातु जंघा
यां विघ्ननाशिनी प्रेतखर्वधरा देवी जानुचक्रे महेश्वरी नीलवर्णा सदा पातु जानुनी स
र्वदा मम नागकुंडलधरा देवी पातु पादयुगे तथा नागहारधरा देवी सर्वांगे पातु स
र्वदा नागकंकणधरा देवी पातु प्रांतरदेशतः चतुर्भुजा सदा पातु शमने शत्रुनाशिनी
खड्गहस्ता महादेवी पातु मां विजयप्रदा नीलांबरधरा देवी पातु मां विघ्ननाशिनी कर्त्री
हस्ता सदा पातु विवादे शत्रुमध्यतः ब्रह्मरूपधरा देवी संग्रामे पातु सर्वदा नागरूपध
रा देवी भोजने पातु सर्वदा शवकर्णा महादेवी शयाने पातु सर्वदा वीरासनधरा देवी
निद्रायां पातु सर्वदा शवकर्णा महादेवी शयाने पातु सर्वदा वीरासनधरा देवी निद्रा

श्री·
त मा·
२५८

288

घोपातुमर्वदा पतुवीणाधरादेवीपातुमांविघ्नसंकले नागोचितकटीपातु देवीमांस
र्वकर्मसु छिन्नमुंडधरादेवीकाननेपातुमांसदा चितामध्यस्थितादेवीमारणेपातु
मांसदा दीपचर्मधरादेवीपुत्रदारधनादिषु अलेकालान्विता देवीपातुमांहरवल्ल
भा रक्तरक्तनदीक्रं नेक्रूं क्रूं फट् समन्विता बीजरूपामहादेवीपर्वतेपातुमांसदा ।
मणिपरिवेष्टिणि देवि महाप्रेतसिवेत्थया रक्तरक्तमुदाहूंक्रूं ॐ ह्रीं स्वाहा महेश्वरी
पुष्पकेतुश्मो पातु काननेपातुमांसदा ॐ ह्रीं वज्रपुष्पे हुंफट् प्रांतरे सर्वकामदा ॐ पुष्पे
पुष्पेमहापुष्पेपातु पुत्रान्महेश्वरी हूं स्वाहा शक्तिसंपुक्ता दारात्रक्ष तु सर्वदा ॐ आं हूं फ
ट् स्वाहा महेशानीपातु द्यूते हरप्रिया ॐ ह्रीं सर्वविघ्नान्तकारिणि देवी विघ्नान्मां सर्व
दावतु ॐ पवित्रवज्रभूमे हुं फट् स्वाहा समन्विता नदितापातुमां देवी सर्वविघ्नविना
शिनी ॐ श्रां: स्वरे खेवज्रे खे क्रूं फट् स्वाहा समन्विता पातालेपातुमां देवी लाकिनी
नाम संस्थिता ह्रीं कारी पातु मां पूर्वे शक्तिरूपा महेश्वरी ह्रीं कारी पातु देवेशी वह्नरूपा महेश्वरी हूं स्वरू
पा महादेवी पातु मां क्रोधवर्द्धिनी फट् स्वरूपा महामाया उत्तरे पातु सर्वदा पश्चिमे पातु मां देवी स्वरूपा हरप्रिया

मध्ये मां पातु देवेशी ॐ स्वरूपा नगात्मजा नीलवर्णा सदा पातु सर्वत्र वा गृभे सदा भवा
नी पातु भवने सर्वैश्वर्यप्रदायिनी विद्यादानरता देवी पातु वक्त्रे सरस्वती प्रमे वा देव
संग्रामे जले च विषमे गिरौ भीमरूपा सदा पातु श्मशाने भयनाशिनी भूतप्रेतालये
घोरे दुर्गा मां भीषणावतु पातु नित्यं महेशानी सर्वत्र शिवदूतिका कवचस्य तु माहा
त्म्यं नाहं वर्षशतैरपि शक्नोमि कथितुं देवि भवेत्तस्य फलं च यत् पुत्रदारेषु बंधू
नां सर्वदेशे च सर्वदा न विद्यते भयं तस्य नृपपूज्यो भवेद्ध्रुवः शुचिर्भूत्वा शुचिर्वापि
पितं देवि भवेत्तस्य फलं च यत् पुत्रदारेषु बंधूनां सर्वदेशे च सर्वदा न विद्यते भयं त
स्य नृपपूज्यो भवेद्ध्रुवः शुचिः भूत्वा शुचिर्वापि कवचं सर्वकामदम् प्रपठन्वा स्मर
न्मर्त्यो दुःखशोकविवर्जितः सर्वशास्त्र महेशानि कविराड् भवति ध्रुवम् सर्ववा
गीश्वरो मर्त्यो लोकवश्यो धनेश्वरः रणे द्यूते विवादे च जयस्तस्य भवेद् ध्रुवम् पुत्रपौत्रान्वि
तो मर्त्यो विलासी सर्वयोषिताम् शत्रवो दासतां यान्ति सर्वेषां वल्लभः सदा गर्वी खर्वी
भवत्येव वादी स्खलति दर्शनात् मृत्युश्च वशतां याति दासास्तस्यावनीभुजः प्रसंगा

श्री.
त मा.
२८५

289

कथितं सर्वकवर्वं सर्वकामदं अपवत्वा समवत्समर्थः पापान्नुग्रहणात्समः आनंदहे द
सिद्धूनामधिपः कविराड्भवेत् सर्ववागीश्वरो मर्त्यो लोकठेयः सदाभवत्वी गुरोः प्रसा
दमासाद्य विद्याश्च गोपिता नैवापिकवर्वे देविदुर्लभं भवनेत्रये गुरुदेवो ह्रवस्मा
तारतत्तौतस्य हर्षप्रिया अभेदेन जपेद्यस्तु तस्य सिद्धिरदूरतः मंत्रोऽस्याधामहेशानि महि
लोमंगमंचरेत् पंचाचाररतो मर्त्यः सिद्धो भवति नान्यथा किंपुनर्मो भवेन्मर्त्यः सिद्धोभ
वति नान्यथा ब्रह्माविष्णुरुद्राद्या ये देवाः सुरसत्तमाः ते इच्छासाधके देवि लज्जाप्रभा
भवंति ते स्वर्गे मर्त्ये च पाताले ये देवाः सिद्धिदायकाः प्रणमंति सदा देवि ते इच्छासाधक
कोत्तमे विद्यात्मकश्च ये देवाः स्वर्गे मर्त्ये रसातले प्रणमंति सदा सर्वे ते इच्छासाधकोत्तमे
इति ते कथितं देवि मायायाः सम्यक् कावीतितं भुक्तिमुक्तिकरं तालाकल्पद्रुलवद्रूपकं आसाद्य
गुरोः प्रसादात्परमं कल्पद्रुमालं वनेमोहेनापि महेन वापि रहितेनाज्ञानेन मृत्युमर्त्यो यस्सिद्धो भवि सर्व
दुःखविपदां पात्रे प्रयातं तत्कोमित्रं तस्य तत्या स्वदेवि विपदं न यं पति तस्या शुभाः लिखित्वा धारये
यस्तु कंठे वामस्तके भुजे तस्य सर्वार्थसिद्धिः स्यात्सम्मतमिव तेते गोरोचना कुंकुमेन रक्तचंदनकेन वा

यावेकैवी महेशानि लिखेन्मंत्रं समाहितः श्मशाने मंगलदिने वह्निदेवपानमथापि वा सं-
ध्यायां देवदेवेशि लिखेन्मंत्रं समाहितः मघायां श्रवणायां वा रेवत्यां वा विशेषतः सिंहरा-
शौ गते चंद्रे कर्कटस्थे दिवाकरेऽपि वा संध्यायां देवदेवेशि लिखेन्मंत्रं समाहितः मघायां
श्रवणायां वा रेवत्यां वा विशेषतः मीनराशौ गुरौ जाते वृश्चिकस्थे शनैश्चरे लिखित्वा धारये-
द्यस्तु उत्तराभिमुखो भवान् श्मशाने प्रांतरे वापि शून्यागारे विशेषतः निशायां तु लिखेन्मं-
त्रं तस्य सिद्धिरचंचला भूर्जपत्रे लिखेन्मंत्रं गुरुणा च महेश्वरि ध्यानधारणयोगेन धार-
येद्यस्तु भक्तितः अचिरात्तस्य सिद्धिः स्याद्वाञ्छाकार्या विचारणा इति श्रीरुद्रयामले तंत्रे उ-
ग्रताराकवचम् अथ ताराकवचम् देव्युवाच नानातन्त्राः श्रुता नाथ विद्याश्च सकला-
स्तथा सांप्रतं श्रोतुमिच्छामि कवचं मंत्रविग्रहम् त्रैलोक्यमोहनं नाम सर्वापद्विनिवा-
रकम् श्रुत्वैव त्वन्मुखान्नाथ कृपया मे प्रकाशय श्रीभैरव उवाच देवदानवविद्याध्रपूजिते प्रा-
णवल्लभे त्रैलोक्यमोहनं नाम कवचं शृणु तत्परम् सर्वविद्यामयं देवि सर्वमंत्रमयं ध्रु-
वम् सर्वरक्षाकरं सर्वसिद्धिविद्याप्रदायकम् वेदव्यासोऽपि यद्धृत्वा सर्वज्ञः पठनाद्यतः य

श्री०
त सा०
२१०

कृत्वा पठनादीशस्त्रैलोक्यविजयी विभुः । धनाधिपः कुबेरोऽपि देवाधिपः शचीपतिः । पठ
नाद्धारणाद्यस्मात् सर्वे दिग्गीश्वराः । सर्वैश्वर्ययुताः संतः सर्वसिद्धिमवाप्नुयुः । यस्य प्रसा
दादीशोऽहं भैरवाणां सुरेश्वरि । क्रोधाधिपो महाभीमो देवेषु प्रथितः प्रभुः । तदद्यामस
सिद्धेभ्यो दयाङ्कितेभ्य प्रवृच्च(?) भक्तेभ्योऽपि पुत्रेभ्यो दत्वा मन्त्रमवाप्नुयात् त्रैलोक्यमो
हनस्यास्य कवचस्य ऋषिः शिवः । छन्दो विराट् देवता च सा ग्रतारा प्रकीर्तिता । धृतवेगो(?)
श्च विद्या याचे(?) विनियोगः प्रकीर्तितः । ॐ ह्रीं स्त्रीं हुं चफट् स्वाहा ह्रीं तारा मे स्तनद्वयं । ह्रीं ह्रीं स्त्रीं हुं
चफट् स्वाहा पातु हृदयं मम । हुं ह्रीं स्त्रीं हुं चफट् बीजेन ताराष्टकं सदावतु । ह्रीं फ्रीं स्त्रीं मे शिरः
पातु हुं पातु ललाटकं । सार्धपंचाक्षरी तारा पायान्नेत्रयुगं मम । ॐ ह्रीं स्त्रीं हुं श्रुती पातु नमस्त
पातु नासिकां तारा अष्टाक्षरी पायात् वदनं सर्वभूषणाः । ह्रीं स्त्रीं हुं फट् स्वच्छ दन्तान् जिह्वां पाया
न्महेश्वरी ह्रीं स्त्रीं हुं चगलं पातु सा पिनीलसरस्वती ह्रीं कंठौ पातु नियतं तारैकाक्षररू
पिणी हुं कान्तं सदा पातु बीजैकाक्षररूपिणी ऐं ह्रीं स्त्रीं हुं चफट् स्वाहा कतारा मे भुजद्वये
ॐ ह्रीं स्त्रीं हुं चफट् स्वाहा पायात् सर्वकामस्वरूपिणी ॐ ह्रीं स्त्रीं हुं नमः पायात् ... तिमहाषट्करी ।

ऐं सौः ॐ ऐं क्लीं फट् स्वाहा कादिद्देशो मे सदावतु अष्टाक्षरी महाविद्या सा ताराद्वस्वरूपिणी
ऐं क्रूं हौं ॐ ऐं श्रीं ह्रीं सा गुल्फदेशं मे सदावतु समस्ताक्षरी वीरगुणारा मूलतारा स्वरूपिणी ॐ ह्रीं
ह्रौं हूं नमस्ताराये सकलपदं ततः उल्लं चेताक्षयपदं ताक्षयच्छरणं वह्नियम् स्वाहेति च महा
विद्या जानुनी मे सदावतु ऐं सौः ॐ ऐं क्लीं फट् स्वाहा नैचपाल परात्मिका ॐ क्रीं ह्रीं हूं फट्
स्वाहा राहू सा चैतान् बालरी महोग्रतारा पादौ मे पातु नित्यं महेश्वरी ऐं ह्रीं श्रीं क्लीं
काहि
ह्लौः वद वद वाग्वादिनीति च कामबीजत्रयं नीलसरस्वती स्वरूपकम् ऐं ऐं ऐं का ह्लिंक
लरी स्वाहेति च ततः हौं मलिपिमयी पातु तारा खिलं वपुः ऐं ह्रीं वा मा लिङ्ग कर्षणी
सरस्वती मनलप्रिया कूर्चं वीयं तालपातु वीर्धं मूलविद्याद्दशाक्षरी तारे माया कूर्चं काली का
मकलाततः उग्रतारे भगे कामः पुनः लस्मीः शिवा क्रूपी सा महाषोडशी श्रीकालतारा
देव्या मया पुना विधिवद्गृहणं देस्यात्त नं मत्तपश्येन येत् पञ्च विद्या मयां गुणमात्रे
तारा विद्यामलेषु च साम्प्रतं कथितं तद्भ्यं कवचं गतष्वाप्रिये इति ते कथितं देवि गुह्या
द्गुह्यतरं परं त्रैलोक्यमोहनं नाम कवचं मंत्रविग्रहम् ब्रह्मविद्यामयं भद्रे केवलं ब्रह्म

श्री
त सा
२९१

291

पके मंत्रविद्यामयं चैतत्कवचं मन्मुखोदितं गुरुमभ्यर्च्य विधिवत्कवचं प्रपठेद्यदि त्रिसं
ध्यं चाथवा ज्ञानी भैरवस्तत्क्षणाद्भवेत् सर्वपापविनिर्मुक्तः कुलकोटिं समुद्धरेत् गुरुस्स्या
त्सर्वविद्यासु ह्यधिकारी नपादिषु शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः शतमष्टोत्तरं
जप्त्वा भवेद्रूमिपुरंदरः त्रैलोक्यं विचरेद्वीरो गणनाथो गुरुः प्रभुः गद्यपद्यमयी वाणी
भवेद्गङ्गाप्रवाहवत् भूर्जे विलिख्य गुलिकां स्वर्णस्थां धारयेद्यदि पुरुषो दक्षिणे बाहौ यो
षिद्वामभुजे तथा सर्वसिद्धियुतो भूत्वा विचरेद्भैरवो यथा नश्यन्ते प्राणघाताद्यापस्माला
द्यादीनि भैरवि मात्स्यानि कुत्सितमानायेवस्तवदाभिभवंति हि तस्य गेहे विरंल स्मी वाणी वक्त्रे
वसेद्ध्रुवं इदं कवचमज्ञात्वा तारां यो भजते नरः अल्पायुर्निर्धनो मूर्खो भवत्येव न संशयः इति
श्रीभैरवीतन्त्रे त्रैलोक्यमोहनं नाम कवचं समाप्तम् अथ गुह्यषोढा शृणु देवि प्रवक्ष्यामि
गुह्यषोढादयं प्रिये न प्रकाश्यमिदं क्वापि तारायाः कायरक्षणे मातृकामातृकावर्णैशुद्धि
न्यासं मातृकास्थले न्यसेन्नैव पुटितं वर्णं मूर्द्ध्नि सदेवेव पार्वति शक्तिबीजेन तथादे विविन्यस्तव्यं प्रय
त्नतः वधूबीजेन तनोदे विविन्यसेत्स्वं समाहितैः वर्मबीजेन महेशानि न्यसेन्नोयं न देतरे ।

ब्रह्मबीजेन तथा मस्य मकलेन तदनन्तरम् । एतद्गोप्यं देवि न प्रकाश्यं कदाचन
ज्ञात्वा च सिद्धिदा लोके तथा देवासुरेषु च अवश्यं अस्य ह्रुकार्येन पूजानन्तफलं लभ्या इति
नैकश्चितं किं विहरन्ति सम्मरसंदरि न प्रकाश्यं तथा केन देवेषु च यथा न पि इति श्री
रुद्रयामले गुप्तषोढा अथ बगलामुखीस्तोत्रम् चलत्कनककुण्डलोल्लसितचा
रुगण्डस्थलीं लसत्कनकचम्पकद्युतिमदिन्दुबिम्बाननाम् गदाहतविपक्षकां कलि
तलोलजिह्वाचलां स्मरामि बगलामुखीं विमुखवाङ्मनस्स्तम्भिनीम् १ पीयूषोदधिम
ध्यचारुविलसद्रक्तोत्पले मण्डपे सत्सिंहासनमौलिपातितरिपुं प्रेतासनाध्यासिनीम्
स्वर्णाभां करपीडितारिरसनां भ्राम्यद्गदां बिभ्रमामित्थं ध्यायति यान्ति तस्य सहसा सद्यो
ऽथ सर्वापदः २ देवि त्वच्चरणाम्बुजार्चनकृते यः पीतपुष्पाञ्जलिं भक्त्या वामकरे निधा
य च मनुं मन्त्री मनोज्ञाक्षरम् पीठध्यानपरोथ कुम्भकवशाद्बीजं स्मरेत्पार्थिवं तस्यामि
त्रमुखस्य वाचि हृदये जाड्यं भवेत्तत्क्षणात् ३ वादी मूकति रङ्कति क्षितिपतिर्वैश्वानरः
शीतति क्रोधी शाम्यति दुर्जनः सज्जनति क्षिप्रानुगः खञ्जति गर्वी खर्वति सर्वविच्च जडति

श्री॰
ते मा
२९२

तिष्ठन्तं चरणाग्रे चिरं श्रीनित्ये मङ्गलाम्ब विश्वनिदिनं कल्याणि तुभ्यं नमः ४ मेचकला
वदले विपुलदलनेत्रो ज्वलित्वेव नेयं चेत्वादिनियं चरणे त्रिजगन्नाथे मैत्रं विचित्रं नतेमा
नः श्रीमङ्गले तिनामलललिते यस्याखिलं नेतोर्ध्वं वेन नामग्रहणेन संसमदिष्ट वेत्स्तं मो
भवेद्धादिनाम् ५ उष्णस्तम्भनमुच्चविध्वसमनं दारिद्र्यविद्रावणं भूम्न `` `` शमनं बल
स्य गाहपत्ये चेतस्समाकर्षणं सौभाग्यैकनिकेतनं मम मुहुश्चाः कारुण्यपूर्णेक्षणे स्मरेमो
मा विरस्तमा विरस्तु श्रुतो मातस्त्वदीयं वपुः ६ मातर्भुजङ्गममहिप्पलववदले जिह्वा वस
कौलयच्चालोक्य ह्रयदेव दैत्यविघ्नगणाम्ब ह्रागति संभय पात्रं त्र्ये पदे वितीत्सागदयागौ
रागिपीतां वरे विष्णोश्च मङ्गले द्वन्द्वशरणमतो कारुण्यपूर्णेक्षणे ७ मातर्भर्विभर्द्वकालिवि
जयेत्वारावित्सायत्रयेस्त्री विधेसम मयेमहे शिवमङ्गले कामे शिवामेवमे मातर्नित्रिपुरे परामरत
रेहवर्गापवर्गप्रदे दासोहं शरणागतः करुणया विश्वेश्वरि त्राहि मां ८ संवंभे वैरस्मं श्चेपवहल
समये वैपने च्छायिमय्येविद्यावादे `` `` श्रनपतिल्पतौ दिक्काले निशायां वपेपवाले
भनेवारि प्रवदसमये निर्जने वा वने वा गच्छं स्तिष्ठन्त्रिकाले यदिह पतनिशि नित्ये श्रामुपात्यपीरः ॥

वेविद्यापरमात्रिलोकजननी विघ्नौघसंहारिणी योषाकर्षणकारिणी जनमनःसंमो
हनेदायिनी स्तंभोत्सारणकारिणी पशुमनःसंदोहसंदायिनी जिह्वाकीलनभैरवी
विजयते ब्रह्मादिमंत्रो यथा ११ विद्यालक्ष्मीसर्वसौभाग्यमायुःपुत्रैःपौत्रैः सर्वसाम्रा
ज्यसिद्धिम् मानंभोगंवश्यमारोग्यसौख्यमाप्ततन्नद्भूतलेस्मिन्नरेशः तत्कालेनैवमुक्ता
हेमाद्रितेपरमेश्वरि दुष्टानांनिग्रहार्थायतेगृह्यतांनमोस्तुते १२ इतिरुद्रयामलेब
गलामुखीस्तोत्रम् अथप्रसंगात्तत्पूजादयोनिरूप्यंते अथचतुःषष्ट्युपचाराः सर्वो
पचारंमेंज्ञास्थितायेपूर्वाः कल्पयामिनमइत्येताःकार्याः ऐंह्रींश्रींपाद्यंकल्पयामिन
मः ऐंह्रींश्रींआचमनीयंकल्पयामिनमः इतिक्रमेणआसनारोपणे सुगंधितैलाभ्यंगे म
ज्जनशालाप्रवेशने मज्जनमंडपमणिपीठोपवेशने दिव्यस्नानीये उद्वर्तने उष्णो
दकस्नाने कनककलशच्युतसकलतीर्थाभिषेके धौतवस्त्रपरिमार्जने अरुण
दुकूलपरिधाने अरुणदुकूलोत्तरीये आलेपमंडपप्रवेशने चंदनागुरुकुंकुमकस्तू
मदकर्पूरकल्हारगोरोचनादिव्यगंधसर्वांगविलेपने केशभारस्यकालागुरुधूप

श्री॰
त सा॰
२५२

293

मल्लिकामालतीजातीचम्पकाशोकशतपत्रपूगकुरवकरवीरपुन्नागकल्हारकुसुमे सर्वतःकु
सुममालाभूषणमेरुपृष्ठवेशने भूषणमणिपीठोपवेशने नवमणिमुकुटे चंद्रशक
ले सीमंतसिंदूरे तिलकरत्ने कालांजने पालीयुगले नासाभरणे अधरयावके ग्रथ
नभूषणे कनकचित्रपदके महापदके मुक्तावलिं एकावलिं देवच्छंदके केयूरयुग
लवलयचतुष्टये वलयावली ऊर्मिकावली कांचीदामकटिसूत्रे शोभाख्याभरणे पादका
टके पादांगुलीयके एककरे पाशे अन्यकरे अंकुशे इतरकरे पौंड्रकचापे अपरेषु
पुष्पबाणान् श्रीमाणिक्यपादुके समावेशनामाभरणे देवताभिः सह महासिंहासनाधि
रोहणे कामेश्वरपर्यंकोपवेशने अमृतासवचषके आचमनीये कर्पूरवाटिका सा
नंदोल्लासविलासहासे मंगलारात्रिके श्वेतच्छत्रे चामरयुगले दर्पणे तालवृन्ते गंधे
पुष्पे धूपे दीपे ताम्बूले नैवेद्ये कल्पयेत् एतेषामुपचाराणामभावे एतेमंत्राः जप्याः
तथा च नवरत्नेश्वरे चतुष्षष्ट्युपचाराणामभावे तन्मन्त्रं जपेत् तत्तत्फलं विंद्या
त्साधकः स्थिरमानसः अथाष्टादशोपचाराः आसने स्वागते पाद्यमर्घ्यमाचमनीयकम्

८५

स्नानेवासोपवीतं च भूषणानि च सर्वशः गंधं पुष्पं तथा धूपं दीपमन्नं च तर्पणम् मा-
ल्यानुलेपने चैव नमस्कारविसर्जनम् अष्टादशोपचारैस्तु मन्त्री पूजां समाचरेत् अथ षो-
डशोपचाराः पाद्यार्घ्याचमनीयं च स्नानं वसनभूषणे गंधपुष्पधूपदीपनैवेद्याचमने
तथा ताम्बूलमर्चनास्तोत्रं तर्पणं च नमस्क्रिया प्रयोजयेत्स पूजायामुपचारांस्तु षोडशा
अथ दशोपचाराः पाद्यमर्घ्यं तथाचामं मधुपर्काचमने तथा गंधादयो नैवेद्यान्ता उप-
चारा दशक्रमात् अथ पंचोपचारमन्त्राः यथा उद्यच्चन्दनकुंकुमारुणपयोधाराभि-
राप्लावितां नानानर्घ्यमणिप्रवालघटितैर्दत्तां गृहाणांबिके आमृष्टां सुरसुन्दरीभि-
रभितो हस्तांबुजैर्भक्तितो मातः सुंदरि भक्तकल्पलतिके श्रीपादुकामाचरेत् १ देवे-
न्द्रादिभिरर्चितं सुरगणैरादाय सिंहासनं चंचत्कांचनसंचयाभिरचितं चारुप्रभाभा-
स्वरम् एतच्चंपककेतकीपरिमिलं तैलं महानिर्मलं गंधोद्वर्तनमादरेण तरुणीद-
त्तं गृहाणांबिके २ पश्चाद्देवि गृहाण शंभुगृहिणि श्रीसुन्दरि प्रायशो गंधद्रव्यसमूह-
निर्भरभवं धात्रीफलं निर्मलम् तत्केशान्परिशोध्य कंकतिकया मंदाकिनीस्रोतसि

श्री
त मा
२९७

294

स्वावाश्रेजनगोधिकेभवतने श्रीमंदरिनमदे ३ स्तनयिपतिकामिनीकस्मरोजनाली
धृतोमवेदनमकुंकमागुरुभवेनविश्रानितो महापरिमलोज्ज्वलोसरसमुद्दकधूमिका
ग्दहाणवदायिनिविघुरमंदरिश्रीपदे ४ गेयवोमरकिन्नरप्रियतमासंतानहस्तांबुज
नश्रव्याशृंधमानमतरलवेकापमीरेनापिनरम मातभीस्वरमानमंडलगलत्कांतिश्रद्
नोज्वलेवेलेनिर्मलमातनोतवमनश्री मंदरिनमदे ५ स्तांकस्मितमंडलस्फुतिपुंगे
हस्तोवुजेस्वद्विकाभ्यमाववमनानितस्यफलकेमज्जोमेखिद्वये हारोक्तामिकंकाणा
काणरणत्कारोकरद्वंद्वके विमलमजटेश्रितस्फदिनेदतोमन्ददलयनो ६ श्रीवावो
धृतकोतिकोनयटलाग्रेवेयकेमंदरेसिंह रेविलमल्लुलाटफलकेसौंदर्यमन्नापरम्
राजत्काजलमञ्चलोत्पल ...... श्रीमोचनेलोचनेतद्दिव्याषधिनिमितेरवयतश्रीएा
भविश्रीपदे ७ श्रमंदतारमंदरोत्मस्थितद्रुपमिधूडुवेनिशाकरकरोपमेविपुरमंदरि
श्रीपदे ग्दहाणमवमौत्तिकेमञ्जरविवसाविदुमेविनिर्मितमयखिदेवतिकांवुज
स्याथिनम् ८ काणरीइववंदनागुरुमयायाराभिरासाविनवेच ॥ ॥

हेमपङ्कपादलासितम्बरमिद्धैस्सुगंधीकृतम् देवस्त्रीगणमण्डलकाश्चितमहासूत्रारि
कंभव्यनेत्रभःश्रीम्यविसंभ्रमेणाविमलेदत्तंमहार्णविके ४ कह्लारोत्पलनागकेसरस
रोजाख्यावलीमालतीमल्लीकैरवकेतकादिकुसुमैर्वक्त्राश्वमारादिभिः पुष्पैर्माल्य
भरेणवैसुरभिनानारसस्रोतसाताम्राम्भोजनिवासिनीं भगवतीं श्रीसुन्दरीं पूज
ये १० मांसीगुग्गुलचन्दनागुरुरजःकर्पूरशैलेयजैर्माध्वीकैस्सहकुङ्कुमैःसुरचितैःस
र्पिर्भिरामिश्रितैः सौरभ्यस्थितिमन्दिरे मणिमये पात्रे भवत्प्रीतये धूपोऽयं सुरकामिनीवि
रचितःश्रीसुन्दरित्वन्मुदे ११ घृतद्रवपरिस्फुरद्रुचिररत्नयष्ट्यान्वितो महातिमिरनाश
नःस्फुरन्नितविनोनिर्मितः सुवर्णचषकस्थितःसघनसारवर्त्यान्वितस्तवत्रिपुरसुन्द
रिस्फुरतुदेविदीपोमुदे १२ लवंगकलिकोज्ज्वलंबहुलनागवल्लीदलैःसमानितफ
लकोमलैःसघनसारपूगीफलम् सुधामधुरिमाकुलंरुचिररत्नपात्रेस्थितंगृहाण
मुखपंकजेस्फुरितमंबताम्बूलकम् १४ शरत्प्रभवचन्द्रमःस्फुरितचन्द्रिकासुन्दरंगल
त्सुरतरङ्गिणीललितमौक्तिकाडम्बरम् गृहाणनवकाञ्चनप्रभवदण्डखण्डोज्ज्वलंमहा

श्री॰
ने मा॰
२५५

295

त्रिपुरसुंदरीं कृत्वा मंडपं त्रैमहत्त ५ मातलब्धं माहमात नोत समभगा स्त्रीभिः समाक्षोलि
ते मधुरं चामरसि दुग्धं दमरूपेण सेवेदंडः खाचाद्यह्म मयाग स्वस्ति च सिद्धनाद दत्त कव्यामादिवा
लौकिकैः सेवितैः क्रियमाणापवर्जिकलाशुभौगिवेदध्वनिः १९ स्वर्गगाने मंगलवेगेन
घोरवेभेरीनिनादैः रूपगीयमाना कोलाहले वाक्कलितानतवाद्य विधायपरीनिस्क कलाह
स्वाय १७ देवि भक्तेरसभावितहृतेश्रीयतेयदि केतो पिलभ्यते १८ पतैः षोडशाभिः पंचे
रुपचारोपकल्पितैः यः पूजादेवतास्तोतिसमते घोफलमाप्नुयात् अथ द्वाग निर्माल्यस
कालनिर्णयः तत्रयोगिनीनेत्रे मणिमालामध्ये वाणी निदेवदत्तानि यानि वनतिर्माल्यं द्वा
दशाहं तावत्पात्रे तथैव च पदीपगांदीचवरण्यासने वेयं दत्तमात्रतः सोदके समरे वेव या
मार्धेन महेश्वरि पहुहृत्रंजिमासाक्ष्यपत्र सूत्रे नरः सरतम यावत्तुल्यं भवेद् त्रैपरमात्र
तथैव च मल्लुकेतु पिदैवैवमुहोरात्रेण या विति मह्वर्तं दपितुगंपेच स्त्रासं यामेनुहर
दिकरवीरमहोरात्रं बिल्वपत्रं तथैव च नपाकुसुममाल्यं वनिर्माल्यं सार्धयामके ।
माल्यैवैकरवीरस्य पमस्य बिल्वकस्य च यामार्धेन महेशानि तोहूलं दत्तमात्रतः ॥

नतिमोल्वेदाडिमंचतथाविल्वफलंप्रिये सौगंधिकंचकदलीप्रयत्नेननिवेदयेत् क
दलीबीजपूरंचदुग्धंपक्वंनिवेदयेत् इतिद्रव्याणांनिर्माल्यकालनिर्णयः अथरुद्रा
क्षमाहात्म्यम् शिवउवाच शिखायांहस्तयोःकंठेकर्णयोश्चापियोनरः रुद्राक्षंधारयेद्भक्त्यासशै
वलोकमाप्नुयात् नववक्त्रंतुरुद्राक्षंधारयेद्वामबाहुना चतुर्दशमुखंचैवशिखा
यांधारयेद्बुधः एकवक्त्रःशिवःसाक्षाद्ब्रह्महत्यांव्यपोहति अवध्यत्वंप्रतिस्तोतोवह्नि
स्तंभंकरोतिच द्विवक्त्रोहरगौरीस्याद्गोवधाद्यघनाशने त्रिवक्त्रोग्निस्त्रिजन्मोत्थपाप
राशिंप्रणाशयेत् चतुर्वक्त्रःस्वयंब्रह्मानरहत्यांव्यपोहति पंचवक्त्रस्तुकालाग्निर
गम्याभक्ष्यपापनुत् षड्वक्त्रस्तुगुहःसाक्षाद्भ्रूणहत्यांव्यपोहति सप्तवक्त्रस्त्वनंतस्या
त्स्वर्णस्तेयाघनुत्सदा विनायकोष्टवक्त्रस्स्यात्सर्वानृतविनाशकृत् भैरवोनववक्त्र
स्तुशिवसायुज्यकारकः दशवक्त्रस्तुतोविष्णुर्भूतप्रेतपिशाचहा एकादशमुखोरुद्रः
नानायज्ञफलप्रदः द्वादशास्योभवेदर्कःसर्वक्रतुफलप्रदः त्रयोदशमुखःकामः
सर्वकामफलप्रदः चतुर्दशास्यःश्रीकंठोवंशोद्धारकरःपरः निश्छिद्राक्षस्यपक्षा

श्री·
त· मा·
२९६

296

षु रुद्राक्षा धारणे स्मृताः पंचास्यं ते पंच मंत्रं स्नानकाले प्रयोजयेत् रुद्राक्षस्य प्रतिष्ठायां
मंत्रं पंचाक्षरं तथा ॐ त्र्यंबकादिमंत्रस्य त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं उर्वारुकमि
व बंधनान्मृत्योर्मुक्षीय मामृतात् यथा ॐ ह्रीं अघोरे ह्रीं कुं घोरतरेभ्यो रे विना मंत्रेण यो
धत्ते रुद्राक्षं भुवि मानवः स याति नरकं घोरं यावदिंद्राश्चतुर्दश ॐ ह्रीं ह्रीं सर्वतः सर्वांगे
नमस्ते रुद्ररूपेभ्यः एतेनापि च मंत्रेण रुद्राक्षस्य हि नो नमः प्रतिष्ठाविधिवत्कृत्वा ततो
धिकं फलं लभेत् ततो यथा स्वमंत्रेण धारयेद्भक्तिसंयुतः ततो क्रमेण मंत्राः ॐ ॐ भ्र
ॐ नमः ॐ ॐ नमः ॐ क्लीं नमः ॐ ह्रूं नमः ॐ ॐ नमः ॐ ॐ ह्रूं नमः ॐ ॐ हुं ह्रूं नमः
ॐ सः ह्रूं नमः ॐ हूं नमः ॐ क्लीं नमः ॐ श्रीं नमः ॐ ह्रूं ह्रीं नमः ॐ ह्रीं हौं नमः ॐ नमो नमः
रुद्राक्षं देहसंस्थं न रुद्रो म्रियते यदि सोपि रुद्रपदं याति किं पुनर्मानवा गुह सप्तवि
ध्यानि रुद्राक्षमालया देहसंस्थया यः करोति नरः पुण्यं सर्वं कोटिगुणं भवेत् यो ददाति हि
जातिभ्यो रुद्राक्षं भुवि षण्मुख तस्य प्रीतो भवेद्रुद्रः स्वपदं च प्रयच्छति इति पद्मपुराणे रु
द्राक्षमाहात्म्ये स्कंदपुराणे कार्तिकेय उवाच एकद्वित्रिचतुःपंचषट्सप्ताष्टनव ।

२८

द्रैकादशद्वादशत्रयोदशचतुर्दश एतेषां तु मुखानां तु देवताः कोऽत्र शंकर शृणोच की
दृशां तेषां कथय मम यथार्थतः श्रीशंकर उवाच शृणु षण्मुख तत्त्वेन वक्त्रे वक्त्रे यथाक्र
मम् एकवक्त्रः शिवः साक्षाद्ब्रह्महत्यां व्यपोहति द्विवक्त्रो देवदेवेशो गोवधं नाशयेद्ध्रुव
त्रिवक्त्रो दहनस्साक्षाद्भ्रूणहत्यां व्यपोहति चतुर्वक्त्रः स्वयं ब्रह्मा नरहत्यां व्यपोहति पं
चवक्त्रः स्वयं रुद्रः कालाग्निर्नाम नामतः षड्वक्त्रः कार्त्तिकेयस्तु धारणाद्दक्षिणे भुजे
ब्रह्महत्यादिभिः पापैर्मुच्यते नात्र संशयः सप्तवक्त्रो महासेन अनन्तो नाम नागराट्
गुरुतल्पादिभिः पापैर्मुच्यते नात्र संशयः अष्टवक्त्रो महासेनस्साक्षाद्देवो विनायकः अ
न्नोदककरेणापि संस्पृष्टो हाटकस्त्रियम् एवमादीनि पापानि अन्यानि पापानि सर्वशः वि
घ्नास्तस्य च नश्यन्ति मुक्तो याति परां गतिम् शृणुष्वैतेन सर्वेषु अष्टवक्त्रस्य धारणात् न
ववक्त्रो भैरवस्तस्य धारयेद्वामके भुजे कपिलमुक्तिदः प्रोक्तो मम तुल्यबलो भवेत् लक्ष
कोटिसहस्राणि ब्रह्महत्यां करोति यः तत्सर्वं दहते शीघ्रं नववक्त्रस्य धारणात् दशवक्त्र
महासेन साक्षाद्देवो जनार्दनः ग्रहाश्चैव पिशाचाश्च वेतालाब्रह्मराक्षसाः पन्नगाश्च वि

श्री.
त सा.
२५७
297

न संपतिदशवक्त्रस्य धारणात् । वक्त्रैकादशरुद्राक्षो रुद्र एकादशः स्मृतः । शिखायां धा-
रयेन्नित्यं तस्य पुण्यफलं शृणु । अश्वमेधसहस्रस्य वाजपेयशतानि च । हेमशृंगगोसहस्र-
लक्षस्य सम्यग्दत्तस्य यत्फलं । तत्फलं समवाप्नोति रुद्रैकादशधारणात् । रुद्राक्षो द्वादशी
वक्त्रैः कंठदेशे च धारणात् । आदित्यस्तु प्रतिनित्यं द्वादशार्कोऽत्रवस्थितः । त्रयोदशमु-
खैः कामः सर्वकामफलप्रदः । चतुर्दशास्यः श्रीकंठो वंशोद्धारकरः परः । तत्क्रमेण मं-
त्राः ॐ ऐं ॐ श्रीं ॐ ह्रीं श्रीं ऐं ह्रीं क्रः ॐ ह्रीं ॐ ह्रीं ॐ ह्रीं ॐ हं वं ॐ ह्रीं ॐ ह्रीं ॐ श्रीं ॐ ह्रीं ॐ ह्रीं ॐ तौं
लौं ॐ कंमो इति रुद्राक्षसंस्कारः । अथ नैमित्तिकादिकर्मभंगे प्रायश्चित्तमाह गौतमी-
ये यत्र कर्मणि वैगुण्यं नित्ये नैमित्तिके तथा । सहस्रं प्रजपेन्मंत्रं मूलं वाष्टशतमेव वा ।
नित्ये सहस्रं प्रजपेत् नैमित्तिके तथाष्टशतम् इति विस्तरविषयम् अन्यत्र तंत्रराजे नित्या-
तिक्रमदोषाणां शांत्यै विद्याशतं जपेत् । नैमित्तिकातिक्रमेण सहस्रं प्रजपेन्मनुम् ।
पापसंकरे तु सर्वेषामेव पापानां संकरे समुपस्थिते प्रायश्चित्तं तत्र तु लक्ष-
मयुतमेव जापतः । अथ विस्तारायतनमंत्राः तत्र गौतमीये रामायनमः

यस्य दर्शनमिच्छन्ति देवा ब्रह्मेन्द्रादयः। कृपया देव देवेश मदग्रे सन्निधी भव। तस्यै ते प
रमेशान स्वागतं स्वागतं च मे। कृतार्थोऽस्म्यनुगृहीतोऽस्मि सफलं जीवितं मम। यदाग
तोऽसि देवेश चिदानन्दमयाच्युत। अज्ञानाद्वा प्रमादाद्वा वैकल्यात्साधनस्य च। यदपूर्णं
भवेत्कृत्यं तथाप्यभिमुखो भव। इत्यावाहनमन्त्राः। मङ्गलिलेशसम्पर्कोऽपरमानन्दसं
भवः। तस्यै ते परमेशान पाद्यं शुद्धाय कल्पये। इति पाद्यम्। देवानामपि देवाय देवानां
देवताय च। आचामं कल्पयामीश शुद्धयापि शुद्धिहेतवे। इत्याचमनीयम्। तापत्रयहरं दि
व्यं परमानन्दलक्षणम्। तापत्रयविमोक्षाय तवार्घ्यं कल्पयाम्यहम्। इत्यर्घ्यम्। सर्वकाल
म्यहीनाय परिपूर्णसुखात्मकम्। मधुपर्कमिदं देव कल्पयामि प्रसीद मे। इति मधु
पर्कम्। उच्छिष्टोऽप्यशुचिर्वापि यस्य स्मरणमात्रतः। शुद्धिमाप्नोति तस्मै ते पुनराचमनं
त्विदम्। इति पुनराचमनीयम्। परमानन्दबोधाब्धिनिमग्ननिजमूर्तये। साङ्गोपाङ्गमि
दं स्नानं कल्पयाम्यहमीश ते। इति स्नानम्। मायाचित्रपटच्छन्ननिजगुह्योरुतेजसे। निरा
वरणविज्ञानवासस्ते कल्पयाम्यहम्। इति वासः। यमाश्रित्य महामाया जगत्सम्मोहनी

श्री·
त सा·
२९८

298

सदा नमस्ते परमेश्वराय कल्पयाम्युत्तरीयकं इत्युत्तरीयं यस्याखिलं येनेदं संप्रोतमखि
लं जगत् यज्ञसूत्राय तस्मै ते यज्ञसूत्रं प्रकल्पये इति यज्ञसूत्रं स्वभावसुंदरांगाय सर्वसमा
श्रयाय ते भूषणानि विचित्राणि कल्पयामि सुरार्चित इति भूषणं नमस्ते देवदेवेश शा
वेल्मिकरूपरे अविशानंदसंपूर्णं गंधस्नानजलमुत्तमं इति जलं परमानंदसौरभ्यप
रिपूर्णदिगंतरं गंधाणां परमं गंधं कृपया परमेश्वर इति गंधः तुरीयागुणसंपन्नं ना
नागुणमनोहरं आनंदसौरभं पुष्पं गृह्यतामिदमुत्तमं इति पुष्पं वनस्पतिरसोत्पन्नो
गंधाढ्यो गंध उत्तमः आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यतां इति धूपः स्वप्रकाशो म
हातेजाः सर्वतस्तिमिरापहः सबाह्याभ्यंतरज्योतिर्दीपोयं प्रतिगृह्यतां इति दीपः तथा च
गीतसमीये पूजा तु पंचधा प्रोक्ता तासां भेदाञ्छृणुष्व मे अभिगमनमुपादानं योगः स्वा
ध्याय एव च इज्या पंचप्रकारार्चा क्रमेण कथयामि ते तत्राभिगमनं नाम देवतास्थानमा
र्जनं उपलेपनं च निर्माल्यदूरीकरणमेव च उपादानं नाम गंधपुष्पादिचयनं तथा योगो
नाम स्वदेहस्य स्वात्मनैव भावना स्वाध्यायो नाम मंत्रार्थसंधानपूर्वको जपः ।

सूक्तस्तोत्रादिपाठश्च हरेस्संकीर्तनं तथा मन्त्रादिषाश्चाभ्यासश्च स्वाध्यायः परिकीर्तितः
इज्यानाम स्वेष्टदेवपूजनं च यथार्थतः इतीयं च प्रकारा वो कथितास्तव सुव्रत सालो-
सामीप्यसालोक्यसायुज्यसारूप्यदाः क्रमात् अथ स्वादश शुद्धीश्च वैष्णवानामिहोच्यते
गृहोपसर्पणे चैव तथानुगमने हरेः भक्त्या प्रदक्षिणे चैव पादयोः शोधनं तथा पूजा
र्थं पत्रपुष्पाणां भक्त्या चोत्तलने हरेः करयोः सर्वशुद्धीनामियं शुद्धिर्विशिष्यते तथा
संकीर्तनाच्चैव गुणानामपि कीर्तनम् भक्त्या श्रीकृष्णदेवस्य वचसः शुद्धिरिष्यते
तत्कथाश्रवणे चैव तस्योत्सवनिरीक्षणम् श्रोत्रयोर्नेत्रयोश्चैव शुद्धिस्सम्यगिहोच्य
ते पादोदकस्य निर्माल्यमालानामपि धारणम् उच्यते शिरसः शुद्धिः प्रणतस्य हरेः
पुनः आघ्राणे गंधपुष्पादिनिर्माल्यस्य तपोधन विशुद्धिस्स्यादनंतस्य घ्राणस्यापि
विधीयते पत्रपुष्पादिकं यच्च कृष्णपादयुगार्चितम् तदेकपावनं लोके तद्धि सर्वं
विशोधयेत् ललाटे च गदाकार्या मूर्ध्नि चापं शरस्तथा नंदकं चैव हृन्मध्ये शंखं च
क्रं भुजद्वये शंखचक्रांकितो विप्रः श्मशाने म्रियते यदि प्रयाणे या गतिः प्रोक्ता सा

श्री. त सा. २४४

299

गतिस्तस्य गौतम नेत्रान्तरे यानैर्वा पादुकाभिर्वा याने भगवतो मन्दिरे देवालये वृमेवा
वस्त्रप्रमाणस्तस्य तः उच्छिष्टे चैव शौचे भगवद्वन्दनादिकं एकहस्तप्रणामश्च पश्च
त्तात्मदक्षिणं पादप्रसारणं वाग्रतस्था पर्यंकवेदने शयने भक्ते वापि मिथ्याभाषण
मेवच उच्चैर्भाषा मिथ्याजल्पो वेदनाति च विग्रहः नियहान्तग्रहौ चैव ग्रथो वाप्रवि
मोचने शक्तौ गौणोपचारश्च अनिवेदितभोजने तत्कालोद्भवानां च फलादीनाम
नर्पणे विनियुक्तावशिष्टस्य प्रदाने भूजनस्य पृत् स्पृष्टोच्छिष्टासने चैव परनिंदापर
निंदापरस्तुतिः गुरौ मौनं निजस्तोत्रं देवतानिंदने तथा ग्रपवा धात्र्या विसोढ़ा वि
पृष्टिरिकीर्तिताः वासिष्ठे केशवाग्रेन्त न गीतं न करोति हरेर्दिने वह्निना किं न दग्धो
सौगते किं नरसातले नास्टोचे स्मरणं कीर्तने विष्णोः कलौ मेत्र जपादिकं दाने तद्गी
तयेतस्य नामभ्यां ति विशिष्यते गौतमीये सालिग्रामशिलातोयमपीत्वा यस्तु मस्त
के प्रक्षेपणं प्रकुर्वीत ब्रह्महा स निगद्यते विष्णोः पादोदकं पीत्वा कोटिजन्माघनाशनं तदेवाष्ट
गुणं पापं भूमौ बिन्दुनिपातनात् आगमस्य हरो हेतिः यदो श्रिता पित्त लसीस्त पंज तेषु पदे वंप

वृक्षमध्यगानवलितं गुर्वांगनासंगमम् स्वात्मादेन मनिस्थिति हृदि जनैर्लसत्संगमं किलि
खेमालिग्रामशिलालस्सिंहमृहिमाकेशखलेकोमेवः सूमप्रबोधकालोथ मन्त्राणामभि
धीयते मन्त्रविद्याविभागेन हि द्विधा मन्त्रजातयः मन्त्राः पुंदेवताः प्रोक्ताः विद्याः स्त्रीदेवताः
स्मृताः पुंमन्त्राः फट्कारान्ताः स्युर्हृदि ठान्ताः स्त्रियः स्मृताः नपुंसकानमोन्ताः स्युरिति सूक्तमत
वस्थिया एवमन्यामभवेद्विद्यामन्त्राणां ह्यनगोपते एवं मन्त्रा अपि अग्नीषोमात्मका मन्त्रा वि
ज्ञेयाः सूर्यसोमयोः कर्मणोर्व्यक्तितां विषयत्वाय समीरिताः आग्नेया मानवाः सौम्या
भूतिविष्टं उक्तास्तथाः आग्नेयाः संप्रबुद्धास्ते प्राणे वहति दक्षिणे भागे वामे स्थिते प्राणे सौम्या
बोधं प्रयान्ति ते प्रयच्छन्ति फलं सर्वे प्रबुद्धा मन्त्रिणां सदा यदा प्राणापानसमाख्योर्वाह्नि
वर्षामयोस्त्रमेलनम् प्रबोधकालाविज्ञेयास्वापकालस्ततः परम् तथा वामबाह्योपरा
वायुःस्वान्तोयोजनेनतदा दक्षिणेस्याः परस्वाङ्गुलदाहीकोणस्यौजिताः उभयस्योपरा
वायुसन्दासाउभयात्मकाः सम्पुटीकृतमन्त्रेणाप्यादिलानामविङ्कान् शेनेसविसर्गो
तान्तकारकेवलेजपेत् एवं मन्त्रोयदिष्टोस्यैकःश्रीत्रसिद्धिदः इतिस्मप्रबोधकालः

श्री.
त सा
३००

300

मुख्ययोगाङ्गासनानि पद्मासनं स्वस्तिकाख्यं भद्रं वज्रासनं तथा वीरासनमिति प्रोक्तं क्रमादासनपंचकं ऊर्वोरुपरि विन्यस्य सम्यक्पादतले उभे अङ्गुष्ठौ च निबध्नीयाद्धस्ताभ्यां व्युत्क्रमात्ततः पद्मासनमिति प्रोक्तं योगिनां हृदयंगमं जानूर्वोरन्तरे सम्यक्कृत्वा पादतले उभे ऋजुकायो विशेद्योगी स्वस्तिकं तत्प्रचक्षते सीमन्याः पार्श्वयोर्न्यस्य गुल्फयुग्मं सुनिश्चितं वृषणाधः पार्श्वपादौ पाणिभ्यां परिवेष्टयेत् भद्रासनं समुद्दिष्टं योगिभिः परिकीर्तितं ऊर्वोः पादौ क्रमान्न्यस्य जान्वोः प्रत्यङ्मुखाङ्गुली करौ निदध्यादाख्यातं वज्रासनमनुत्तमं एकं पादमधः कृत्वा विन्यस्योरौ तथेतरं ऋजुकायो विशेद्योगी वीरासनमितीरितं अथ मुद्राप्रकरणं अथ मुद्राः प्रवक्ष्यामि सर्वतन्त्रेषु गोपिताः याभिर्विरचिताभिस्तु मोदन्ते सर्वदेवताः अर्चने जपकाले च ध्याने काम्ये च कर्मणि स्नाने वावाहने शोषे विशेषान्निष्ठायां च तर्पणे नैवेद्ये च तथान्यत्र तत्तत्कल्पप्रकाशिते स्थले मुद्राः प्रयोक्तव्याः स्वलक्षणलक्षिताः आवाहनादिका मुद्रा नव साधारणा मताः तथा षडङ्गमुद्राश्च सर्वतन्त्रेषु गोपिताः एकोनविंशतिर्मुद्रा .... या तथा गणेशस्योक्ता तथा मुद्रा विष्णोर्लक्ष्म्या ... वर्षिणी

५२९

नारसिंही च वाराही हयग्रीव पदस्ततस्तथा बाणमुद्रा च परशुर्जगन्मोहनिका तथा काम
मुद्रा परा ख्याता शिवस्य दशमुद्रिका लिंगयोनित्रिशूलाक्षमालेष्टाभीमृगाख्यिका खट्
वांगाच कपालाख्या डमरुस्सिमवलोभदाः सूर्यस्यैकैव पद्माख्या सप्तमुद्रा गणेशितुः दंतपा
शांकुशाविघ्नपरशुलड्डुकाः बीजपूराह्वया मुद्रा विज्ञेया वह्निपूजने पाशांकुशवरा
भीतिखड्गचर्मधनुश्शराः मौषलीमुद्रिका देवी मुद्राः पाठिक्रियेऽवनाः लक्ष्मीमुद्रा वैने
लक्ष्म्या वाग्वादिन्याश्च पूजने अक्षमाला तथा वीणाख्याव्याख्यापुस्तकमुद्रिकाः सप्तजिह्वा
ह्वया मुद्रा विज्ञेया वह्निपूजने मत्स्यमुद्रा च कूर्माख्यो लेलिहा मुंडमस्तकाः महायोनि
रिति ख्याता सर्वसिद्धिसमाह्वया पात्रपूर्वने महायोनिः श्यामादेवे त्रयमुद्रिकाः मत्स्यकूर्मौ
लेलिहाख्या सर्वसाधारणी मता श्यामामुद्रिका ज्ञेया त्रिपुरायाः प्रपूजने संहारमुद्रा वाणा
कर्षं च विषोन्मादमहांकुशाः त्रिवर्गो वा नयोन्याख्या त्रिविडापरिकीर्तिता क्रमभद्रा भि
षेकस्या त्र्यम्बमुद्रा सनेत्रणा कालकाली प्रयोक्तव्या विघ्नप्रशमकर्मणि गालिनी च श
योक्तव्या जलशोधनकर्मणि श्रीगोपाल पूजने वेणुः नृहरी नारसिंहिका वक्रहस्त च पूजा

श्री.
त.सा.
३०१

301

योवाराहाख्या प्रदर्शयेत् तामावर्तनेयन्त्रबीणामुद्रैवपरश्चलया पवश्चुरामस्यविन्ने
यानंगात्माहन्तमेलिका वामदेवाद्योध्यानेकं भमहालवत्तणे सर्वत्र प्राणं नैवेवश
र्थनाम्ना प्रयोजयेत् मुद्रालक्षणमाह यामले मोहनालवदेवानां द्रावणात्मापसं
तते: तस्मान्मुद्रेयमाख्याता सर्वकामार्थसाधने ३ ईशानकमादासामुख्येनेलक्ष
णानिव हलाभ्यामेजलिंबहानामिकामूलपर्वणोः अंगुष्ठौ निक्षिपेत्सेयं मुद्रानावा
हनी स्मृता १ अधोमुखीत्वियं चेत्स्यात्स्थापिनी मुद्रिका स्मृता २ उच्छितांगुष्ठमुष्ट्यो
स्तु संयोगात्संनिधापनी ३ अंतःप्रवेशितांगुष्ठा सैव संरोधनी मता ४ उत्तानमुष्टियुगलास
मुखीकरणी मता ५ देवतांगेषडंगानां न्यासः स्यात्सकलीकृतिः ६ सव्यहस्तकृता मुष्टि
दीर्घाधोमुखतर्जनी अवगुंठनमुद्रेयमभितो भ्रामिता मता ७ अन्योन्याभिमुखाश्लिष्ट
कनिष्ठानामिका पुनः तथैव तर्जनीमध्या धेनुमुद्रा समीरिता अमृतीकरणं कुर्यात्तया
साधकसत्तमः अन्योन्यग्रथितांगुष्ठा प्रसारितपरांगुली महामुद्रेयमाख्याता परमीक
रणे बुधैः प्रयोजयेदिमां मुद्रां देवताह्वानकर्मणि अंगन्यासस्य मुद्रायाः तालक्षणं शेमके

वेस्ववीणां तु मुद्राणां कथ्यन्ते लक्षणान्यथ वामांगुष्ठं तु संरुद्ध्य दक्षिणेन तु मुष्टिना ह
स्तोत्तानेतलेनो मुष्टिमंगुष्ठं तु प्रसारयेत् वामांगुल्यास्तथा श्लिष्टाः संयुक्ताः संप्रसारिताः
दक्षिणांगुष्ठसंस्पृष्टाः मुद्रैषा धेनुमुद्रिका १ हस्तौ तु सम्मुखौ कृत्वा समध्यौ संप्रसारितौ
कनिष्ठांगुष्ठकौ लग्नौ मुद्रैषा वज्रमुद्रिका २ अन्योन्याभिमुखौ हस्तौ कृत्वा तु ग्रथितांगुलीः
अंगुल्यौ मध्यमे भूयः संलग्ने संप्रसारिते गदामुद्रेयमुद्दिष्टा विश्लेषसंतोषकारिणी ३
हस्तौ तु सम्मुखौ कृत्वा संनताग्रसतांगुलीः तलान्तर्मिलितांगुष्ठौ कृत्वैषा पद्ममुद्रिका
गेष्ठ वामकरांगुष्ठं लग्नमस्य कनिष्ठिका दक्षिणांगुष्ठसंयोगात्कनिष्ठा संप्रसारिता त
र्जनी मध्यमानामा किंचित्संकोच्य चालिताः वेणुमुद्रा भवेदेषा सगुह्या प्रेयसी हरेः ५ अ
न्योन्यपृष्ठकरयोः मध्यमानामिकांगुली अंगुष्ठेन तु बध्नीयात् कनिष्ठामूलसंस्थिते त
र्जन्यौ कारयेदेषा मुद्रा श्रीवत्ससंज्ञका ६ अनामापृष्ठसंलग्नां दक्षिणस्य कनिष्ठिकां कु
निष्ठयान्यया बद्धा तर्जन्या दक्षया तथा वामानामां च बध्नीयात् दक्षिणांगुष्ठमूलके अं
गुष्ठमध्यमे वामे संयोज्य सरलाः पराः चतस्रः पश्चसंलग्ना मुद्रा कौस्तुभसंज्ञका ७ स

श्री. त सा. ३०२

302

षाकेष्ठादिपादोतेतर्जनीमंगुष्ठयात्तथा कोर्द्धयेन्मालावन्मन्त्रैर्यं वनमालिका ९ तर्जनी-
मंगुष्ठकोमलकावग्रतोहृदि विन्यसेत् वामहस्तोत्तानेवामजान्वूर्ध्वप्रविन्यसेत् तान
मुद्राभवेदेषावामवक्षस्थप्रयामी ९ अंगुष्ठवाममूर्द्धं इतिमितरकरांगुष्ठकेनाथव
द्धा तस्याग्रेपोड्यित्वांगुलिभिःपिवतावामहस्तांगुलीभिः वद्धामाद्धेहृदिस्थापय
त्विमलयौर्ध्वाहस्तमारवीजेविल्वाख्योमुद्रिकेषास्फुटमिहकथितागोपनीयाविधि
ने: १ हस्तोत्तविमलवोकुलाग्रयोयित्वाकनिष्ठिके मिथस्संजेनिकास्मिंष्ठेस्निष्ठावेग
ष्ठकोतथा मध्यमेनामिकेहेतस्थोपताविववालयेत पक्षागफडन्मुद्राख्योविलोमस-
तोषवर्षिनी ११ जानमध्यकरौकृत्वाविवृकोष्ठोसमाहतौ हस्तोवमूमिमेलयोकम्पमा
न:पुन:पुन:मत्वे विह्नतकेऽर्ध्यालेलिहानश्चनिह्विका नारसिंहीभवेदेषामुद्रानत्प्रीति
वर्षिनी अंगुष्ठाभ्यांचकरयोरथ्याक्रम्यकनिष्ठिके अधोमुखीभिस्तवीभिःमन्त्रैर्येन्मुहृदे
मेता २ देवोपरिकरेवामेहस्तोजानमयःस्पृशेः नामथेदितिमेप्रोक्तामुद्रावाराहसंज्ञि
का ३ दत्तहस्तेचोर्ध्वमत्वेवामहस्तेमधोमत्वे अंगुल्यग्रेतस्पृष्टकेमुद्रावाराहसंज्ञिका

५

वामहस्ततले दत्त्वाङ्गुलीस्तास्त्वधोमुखीः मध्ये मध्यमध्यमां नासां मध्ये त्रस्था योविशेच्चये
त् हयग्रीवप्रियामुद्रा तन्त्रलिङ्गकारिणी ५ नामस्य मध्यमाग्रे तु तर्जन्यग्रेण योजयेत्
अनामिकाकनिष्ठे च तस्यां गुष्ठेन पीडयेत् दर्शयेद्वामके स्कन्धे धनुर्मुद्रेयमीरिता ९ द
तमुष्टिस्थितर्जन्या दीर्घया बाणमुद्रिका ० यद्वा ज्ञानार्णवे यथा हस्तगते चापे तथा स्क
न्धे कृतप्रिये चापमुद्रेयमाख्याता वामहस्ते ध्रुवस्थिता कल्पद्रुमे धनुर्मुद्रा यशःकी
र्त्तिः विवर्धिनी यथा हस्तगता बाणा तथा स्कन्धे कृतप्रिये बाणमुद्रेयमाख्याता त्रिवर्गनिके
तनी तले तले सकरयोस्तिर्यक्कृत्वा योस्तु वांगुलीः संहताः प्रसृताः कुर्यान्मुद्रा परशुसंज्ञ
का ११ कुर्यात्स्या गुष्ठमुष्टौ हेमुद्रा त्रैलोक्यमोहिनी हस्तोत्तमुण्डे सकृता प्रसृतांगुलिको
तथा तर्जन्योर्मध्यमाङ्गुष्ठे अङ्गुष्ठो मध्यमास्थितो कामसुद्रेयमुदिता सर्वदेवप्रियंकरी
